Trinity College
Trinity College Digital Repository

East Collection Library Digital Collections

1848

# The glory of Jesus Christ = Sŕî-Yeshú-Khrishta-Máhátmyama : a brief account of our Lord's life and doctrines, in Sanskrit verse, with an English preface containing a summary of the contents.

Ostell & Lepage

Follow this and additional works at: https://digitalrepository.trincoll.edu/eastbooks

## Recommended Citation

Ostell & Lepage, "The glory of Jesus Christ = Sŕî-Yeshú-Khrishta-Máhátmyama : a brief account of our Lord's life and doctrines, in Sanskrit verse, with an English preface containing a summary of the contents." (1848). *East Collection*. 96.
https://digitalrepository.trincoll.edu/eastbooks/96

This Book is brought to you for free and open access by the Library Digital Collections at Trinity College Digital Repository. It has been accepted for inclusion in East Collection by an authorized administrator of Trinity College Digital Repository.

Trinity LSF
A0010338

Eastern
Academic
Scholars'
Trust

STOR.

BT
301
.G56
1848

CLASS. 491.2
BOOK. VOL. G56

Trinity College.

THE GIFT OF
Mrs F. FitzGerald.

Accession No. 25583.

श्रीयेषुख्रीष्टमाहात्म्यं ॥

*The Glory of Jesus Christ.*

---

A

BRIEF ACCOUNT

OF

# Our Lord's Life and Doctrines,

[illegible]

[illegible]
[illegible]

---

Calcutta:

OSTELL AND LEPAGE, BRITISH LIBRARY.

[illegible]

# श्रीयेषूखृष्टमाहात्म्यं ॥

*The Glory of Jesus Christ.*

A

BRIEF ACCOUNT

OF

# Our Lord's Life and Doctrines,

*IN SANSKRIT VERSE:*

WITH AN ENGLISH PREFACE CONTAINING A SUMMARY
OF THE CONTENTS.

Calcutta:

OSTELL AND LEPAGE, BRITISH LIBRARY.

1848.

**Calcutta:**

PRINTED AT BISHOP'S COLLEGE PRESS, BY J. C. SHERRIFF.

1848.

# PREFACE.

---

The object of this Tract is to give a brief account of the prophecies by which our Lord was foretold, and of his birth, life, miracles, discourses, death, and resurrection. It has been my aim to write clearly and plainly, to put every thing in a way in which it will be easily understood by persons previously ignorant of the subject, and to supply all necessary explanations. Sanskrit verse has been employed (as heretofore by Dr. Mill in his Christa Sangítá) as the medium most acceptable to learned Hindus; but as the majority of persons called Pundits are not sufficiently masters of Sanskrit to make out correctly the meaning even of such a simple composition, it is proposed to reprint the Tract hereafter with a Hindi

version at the foot of the page. Another edition with the Sanskrit printed in the Bengali character, (with which the Bengal Pundits are most familiar) with a Bengalee translation, may also follow. The Tract, it is hoped, is long enough to give a clear idea of the character of the prophecies by which our Lord's coming was predicted, and of the tenor of his life and doctrines to a class of readers whose indifference or hostility might indispose them to read with attention a composition of greater extent.

Free use has been made of the renderings of terms in Dr. Mill's Christa Sangítá and in Dr. Yates's Sanskrit New Testament, and some entire Slokes of the former have been employed.

The Sanskrit title of the Tract is *Srí-Yeshú-Khrishta-Máhátmyam.* The word *Máhátmya* means greatness or glory, and is employed as the title of sections of the Purânas, written to celebrate the praise of some god, or goddess, or sacred spot. The well known *Durgá Máhátmya,* or glorification of Durga, may be mentioned as an instance. The use of this term, as the title of a poem descriptive of our Lord's life and character, seems unobjectionable, and may excite attention.

The Tract is divided into six sections, which will now be analysed in their order. Those parts which

are not translations of Scripture, or sketches of Scripture History, will generally be given at length in this English abstract.

I. The first section is entitled *Sri-Mahámoktri-pratíkshá*, or *the expectation of a great Redeemer*, and comprises 108 Anushtubh Slokes, in which simple metre the whole Tract is composed. It opens thus:—

" I, who am of feeble voice, being intent to sing the praises of the world's Redeemer, implore God to grant me significant and attractive language.

" A certain youthful seeker after truth, approaching a learned man of great experience and skilled in foreign Sástras, said to him—Sir, I have repeatedly heard the name of a great Teacher, called Christ, from the mouth of his followers. Now, learned men ought to be acquainted with the accounts of those great persons whose fame at present pervades the whole world. My curiosity, therefore, in regard to the history of Christ, appears to me to be every way laudable, and not blameable. And knowing you to be acquainted with that history, I have come here, and desire through your kindness to hear its substance. The learned man replies: I applaud your desire to know the acts of great men, and will gladly satiate

you with the nectar of the history. But it is a most momentous theme, which I, feeble in understanding, am about to treat,—the fall of the world into the ocean of sin, and the achievements of its Deliverer. How can that infinite Being, whose greatness passes the knowledge of the holy hosts of heaven, be worthily celebrated by one such as I am? But taking from the ocean (*lit.* mine of gems) of revelation the gems of knowledge, I shall endeavour to string them together in the necklace of my narrative.

*"I shall therefore narrate with joy the wonderful story of Christ, the Son of God, the eternal Lord of the world, who descended among men, veiling the marks of His deity;—who was born of a virgin mother, and assumed the body of an infant, was untouched by the least taint of sin, but endured its consequences;—the teacher, friend, redeemer, and lord of the world, the author of the world's welfare, the benefactor of all nations;—impelled to my task by supreme love for that noble-minded Being."

The narrative then begins with the creation of our first parents, and proceeds with their fall through the temptation of Satan, (who, it is explained, was

* This sentence, consisting of four Slokes, is imitated from a passage at the commencement of the well known poem of Kálidása, the Raghuvansa.

an angel, once obedient, but who had rebelled against God;) their expulsion from Eden, and the doom pronounced, together with the promise vouchsafed of the woman's Seed who should bruise the serpent's head. The continuity of the expectation which was entertained of this Deliverer is then alluded to, and an account of the further predictions of His coming is introduced by a sketch of the continued corruption and wickedness of mankind, and their destruction, except Noah and his family, by the deluge. After stating that Noah's descendants at first possessed the true knowledge, and practised the pure worship, of God, but that both became corrupted by idolatry,—the narrative describes the call of Abraham, designed as a means of restoring true religion, the covenant entered into with him by the Almighty, and the promises made to him of a son, and of the blessing to be conferred on all nations through his seed. The history of his descendants is then traced; the dying prediction of Jacob in regard to Shiloh is noticed; and the oppression of his descendants in Egypt, the exodus, and the delivery of the Law from Sinai, are narrated. The sacrifices of the Mosaic dispensation, it is observed, had no power to put away sin, and were but shadows of the expiation to be afterwards made by the death of

Christ. The prediction of Moses about the prophet like to himself who was to arise, is cited. The arrival of the Israelites in Canaan is noticed; the design of God, that they should be the conservators of true religion and a light to the surrounding nations, is stated; and their ingratitude and idolatries, their consequent punishment, and their subsequent recoveries and relapses, are adverted to. Mention is next made of the appearance of a series of prophets who instructed and warned their countrymen, and almost all foretold a great future Deliverer of their race. The prophecy to David about the perpetuity of his line and throne is first quoted, with mention of his own Psalms; then the predictions of Isaiah, describing the dignity (Ch. ix.) and sufferings (Ch. liii.) of Christ; then that of Micah (Ch. v.) about His birthplace, and that of Daniel (Ch. ix.) about the time of His advent, are cited nearly at length, but some of them somewhat modified in form. The existence of the collection of these Jewish Scriptures, in their original tongue, till the present day, and their translation into Greek, about 300 years before Christ, are then mentioned. The expectation of a great Deliverer which thence arose in other countries of the West; the corruption of religion in those nations, though distinguished for their intellectual culture; the idolatry

of the vulgar, and the ineffectual search of the philosophers after the highest truth; the diffusion of a knowledge of the Jewish Scriptures by the Jews who settled in foreign countries; and the hope thence embraced by many good men of the coming Saviour, are then adverted to. The doctrine of a divine incarnation was also always received in India, as appears from these words of Krishna in the Bhagavad Gitá. "Whenever, oh Bhârata, righteousness declines, and unrighteousness springs up, then I create myself. For the deliverance of the good, and destruction of the wicked, I am born in every Yuga."

II. The second section, entitled *Yeshútpatti-varnanam*, or *a narration of the birth of Jesus*, begins with this verse: "That Sun of righteousness, by the rays of whose advent the sky had before been reddened, at length arose at the foreordained time." The lineage of the Virgin Mary, the annunciation, the suspicions of Joseph, the angelic vision by which they were removed, the journey to Bethlehem, and the birth of Jesus there, the apparition of Angels to the shepherds, and the angelic Hymn, are then recounted in twenty-six Slokes.

The scholar then enquires how this incarnate Saviour was God and the Son of God. The teacher

in reply quotes St. John i. 1—5, 14, 18, 10, and 12: Coloss. i. 15—17: Philipp. ii. 7. The circumcision of Jesus, the visit of the Magi, the presentation of Jesus in the temple, the flight into Egypt, with the slaughter of the innocents, and the incidents of the visit of Jesus when twelve years old to the temple, with His return to Nazareth and subjection to His reputed parents, are then narrated in order. This section consists of sixty-two Slokes.

III. The third section, entitled *Adbhutakriyá-varnanam*, or *an account of the wonderful works*, gives some account of the miracles of Jesus, and extends to 137 Slokes. It begins by stating, that He did not take upon Him the office of a public instructor till He attained the age of thirty years. The appearance of John, as the forerunner of the Christ, and his testimony (Matth. iii. 11, 12) to his Lord's superior dignity, the baptism of Jesus, and the further witness borne by John (John i. 19, 20, 29: iii. 27, 28, 30—32, 34—36,) to his master's glory, are next recorded.* Jesus then, the narrative proceeds, entered on His office, and traversed the whole of Judæa,

* It is to be understood, that these and the following passages of Scripture which are indicated, are mostly given at length in the Sanskrit.

proclaiming His new kingdom of righteousness; calling on men to embrace the good tidings; by words of power, yet with gentleness, leading them to the consideration of their highest interest; and working innumerable miracles to prove His Divine mission. Of these miracles a select number are related in detail, viz. the cure of the leper, Matth. viii. 2, 3; of the two blind men, Matth. xx. 30—34 (and the parallel passages); the feeding of the five thousand, Matth. xiv. 15—21, &c.; the casting out of the devil from the Syrophœnician woman's daughter, Matth. xv. 22—28; the raising from the dead of the widow of Nain's son, (Luke vii. 11—16,) of the daughter of Jairus (Matth. ix. 18, 19, 23—25, &c.,) and of Lazarus, (John xi.) "By such wonderful works, it is observed, Jesus manifested His superhuman power, and proved His divine commission to promulgate a new revelation. By the display of these miracles He also incited men to attend to His instructions. Another result of these acts was to illustrate His words. Jesus declared, that He came to save and not to destroy mankind; and in conformity with this saying, the course of His actions is beneficent, removing suffering, and delivering the wretched. Possessed of infinite power, He always acted with gentleness, and never destroyed the wick-

30—37. Seeing men distressed with anxiety about their bodily sustenance, He thus taught them trust in God, Matth. vi. 25—32. He illustrated the care of God for our preservation, Matth. x. 29, 30. He showed by three parables how God desires the conversion of men from sin, Luke xv. 4—32. He illustrated God's willingness to hear the prayers of all, and to grant the supplicated blessings, Matth. vii. 7—11. But that prayer for the objects of our desire must be intent, earnest, and repeated, He thus made clear: Luke xviii. 2—7; xi. 5—8. Being asked which was the greatest of God's commandments, He replied, Mark xii. 30—33. The Jews of that period always assembled in the Holy City of Jerusalem to worship God at the times prescribed in the Law; but other heretical inhabitants of that country, called Samaritans, set up in their own country a new temple. The Lord having once come into the country of these heretics, entered into conversation with a certain woman of that place. She perceiving by His words that He was possessed of miraculous knowledge, thus mentioned her doubts in regard to the difference of creeds, John iv. 20, and received from Jesus the following reply, signifying that the worship of devout men, wherever performed, is acceptable to God, John iv. 21, 23, 24.

Originally mankind was created in the image of God, perfectly pure, and possessed of divine knowledge. Whence recognizing the holy nature of God, and delighting in the contemplation of Him, they were devoted to His Service. But from the time when the Parents of the human race fell from their first estate, the original Divine image in them became defaced. Thence their descendants, losing the true knowledge of God, began to imagine, and to serve, many gods. And even those persons who, from divine instruction, possessed true knowledge, almost forgot God, being much devoted to earthly objects. How, then, can the flame of love to God, which has become nearly extinguished, be rekindled in the hearts of men? And how can the soul, which is now devoted to earthly objects of trifling moment, be led again to ponder the grand chief-object? Wise men of all countries sought an answer to this question, but could not discover the truth. But that means of perfecting the soul, which they sought for in vain, was set forth by Christ, viz. regeneration, John iii. 1—8. But regeneration and other spiritual blessings are all granted by God to men through His Son. He it is who is appointed by the Father to be the Saviour of mankind, and salvation is obtained by faith in Him. This He

himself stated, John iii. 16—21. Jesus declared His own infinite dignity, and His ineffable oneness with God the Father, Matth. xi. 27. Further, by the comparison of a shepherd and his sheep, the Lord explained His relation to those who take refuge with Him; and from His oneness with His Father made clear His own power to protect them, John x. 27—30. Again, He declared His own eternity to the Jews who were unwilling to admit His divine mission, John viii. 56—58. By illustrations derived from food and other necessary things, He declared Himself to be the author of salvation, John vi. 35, 51: viii. 12: xiv. 6: xv. 4, 5: xi. 10, 11. He who was called the Son of Man from His assumption of a human body, thus made known the object of His advent, Matth. xx. 28. He promised the gift of the Holy Spirit to enlighten the minds of His disciples in discerning the mysteries of religion, John xiv. 16, 17, 26. He thus explained to a band of devoted followers the perfection to which those attain who submit to His commands, John viii. 31—36. Those who are distressed by calamity, error, and sin, find peace by taking refuge with Christ. This He himself showed, Matth. xi. 28—30. He announced His own return at the end of the world to determine with justice the destinies of men, Matth.

xxv. 31—46. He declared what will be the doom of those rich men whose hearts cleave to the world, and who seek only their own pleasure, Luke xvi. 19—31. He thus taught certain Jewish sceptics what a pure happiness will be obtained by the righteous in heaven, Luke xx. 27—36. Thus comforting the meek and alarming the stony-hearted, did the Great Teacher seek to lead all men to salvation."

V. The fifth section, entitled *Yeshwah pránasamarpanam*, or *Jesus yielding up His life*, extends to 116 Slokes. It begins by the pupil asking his teacher how the clear prophecy of His own death, which Jesus delivered (Matth. xx. 28), was fulfilled. The teacher replies, that after quoting from the Scriptures some other predictions of Christ in regard to His own death, he will relate their fulfilment. Matth. xx. 18, 19: John x. 18: xii. 23, 24, 31, are accordingly cited. The approach and triumphant entrance of Jesus into Jerusalem, and the effect of this on the rulers, are then noticed; and their hostility is thus explained.* "The priests and teachers of the law were famed in their own country for the purity

* See on this subject Milman's History of Christianity, in loco.

of their religious practice. For they searched out the minutely-exact import of all the ordinances prescribed in the Scriptures, and by the observance of these they sought after the reputation of holiness. Hence, though generally crafty and corrupt in heart, they obtained great honor among the people from the sanctity of their outward conduct. But Jesus, unfolding the true meaning of the ancient Scriptures, and teaching a new doctrine, made their learning of no avail. For, when a new and better divine-revelation is proclaimed among men, the importance of those persons who are skilled in the meaning of the ancient Scriptures, will soon decline. Moreover, the heart-searching Jesus openly rebuked those who were inwardly impure, though outwardly pure. Incensed at these rebukes, and proud of their own sanctity, they sought to revenge themselves on Him who unveiled their deceit. Further, they mistook the true purport of what the prophets had said in reference to the future Redeemer. They vainly expected that he would appear with great might and royal majesty, and subjugate the world to their authority. But Jesus did not desire to establish a temporal empire, but an empire of righteousness, which should destroy the might of sin. But the Jews, indifferent to the jewel of righteousness, and devoted to the world,

despised such a kingdom of righteousness. They accordingly sought an opportunity to put Jesus to death." The treacherous proposals of Judas to the chief priests, the last supper, the events in the garden of Gethsemane, the capture of Jesus, His trial before the high priest and council, condemnation, arraignment before Pilate (who, it is explained for the information of the Hindu reader, was the governor appointed by the Roman Emperor, to whose rule Judæa was then subject), His declaration of the nature of His kingdom, the efforts of the Jews to procure His punishment, Pilate's repeated declarations of His innocence and endeavours to release Him, the scourging He suffered, the insults of the soldiers, the mock worship with the purple robe and the crown of thorns, Pilate's attempt to excite the pity of the Jews, and final abandonment of Jesus to their will, after the significant act of washing his hands in their presence, with the arrival of Jesus at the place of punishment, are then traced in some detail.

The punishment of crucifixion is then described thus, in much the same terms as by Dr. Mill in the Christa Sangítá. "The cross was constructed by the Romans of two timbers, one of them perpendicular, and the other fastened to it at right angles. The lower part of the instrument being firmly fastened

in the ground, the horizontal timber stood about nine feet from the ground. To this horizontal timber the extended hands, and to the perpendicular one the feet, of the criminal were fastened with iron nails. The criminal being thus suspended with his hands and feet pierced, after suffering severe torture, expired by degrees." The crucifixion of Jesus between two thieves, His prayer for His murderers, the taunts of the chief priests and others, the prayer of the penitent robber and the Lord's answer, the supernatural darkness, the death of Jesus with the accompanying portents, the application of Joseph for His body, and His burial, are then narrated.

VI. The last section is entitled *Sri-Yeshwah Swargárohanam*, or *the ascension of Jesus into heaven*, and extends to 69 Slokes. It commences by the pupil asking how the prediction of Jesus, that He would rise again on the third day, was fulfilled. The teacher replies, "that our Lord's followers expected that He would display great miraculous power and majesty, and destroy the might of His enemies. But when they had put Him to death, unresisting, the disciples became disappointed and dejected; and entirely forgot the predictions which He, while alive, had repeatedly uttered in regard

to His own resurrection. The day on which Jesus was buried was Friday, and the succeeding day was the day of rest: for the Jews always regarded the Saturday as holy, and rested on that day from worldly occupations." The earthquake which occurred on the following day, the descent and apparition of the angels, the visit of the women to the sepulchre, (which is described as excavated in the rock,) the Angel's address to them, their departure, the arrival of Peter and John, and their examination of the empty tomb, the appearance of Jesus to one of the women, the message she received to carry to the disciples, and their incredulity, are next narrated in order. The appearance of of Jesus to the two disciples going to Emmaus, and His subsequent apparition to the assembled disciples, are then told nearly at full length. His further appearances, instructions, commission to His disciples (in the words of St. Matth. xxviii. 18—20), and ascent into heaven, are then traced. The subsequent events after the return of the disciples to Jerusalem are thus told. "They remained there in faith, expecting the descent of the Holy Spirit promised by the Lord. After ten days, indicated by miraculous signs, that power-imparting Spirit descended into the souls of the disciples. They thence acquired

the miraculous knowledge of foreign tongues, and clearness of mental vision in perceiving the mysteries of their faith. And straightway with boldness they proclaimed the resurrection and ascension of their Lord, even in the midst of the city of His murderers (Acts ii. 36, v. 31, iv. 12). After this, energetically passing over the limits of their own country, they made known their Lord's religion in many foreign countries; and exhorted the idolatrous inhabitants, to abandon their own false deities and worship the true God." The substance of St. Paul's discourse at Athens (Acts xvii. 23—25, 28—31) is then expressed as embodying the purport of their teaching, with this addition, that as many as repent, betake themselves to the Redeemer, and walk in the path of righteousness, shall be saved. The following brief statement of the progress of Christianity closes the Tract: "By these and similar exhortations, supported by wonderful works, many persons were drawn to believe in Jesus Christ. But the rulers of the world, beholding the rise of this religion, endeavoured to stop its progress by violence and other means. In order, that by suffering, the Christians might be led to deny their Lord, cruel kings afflicted them with various punishments. But many of them being endued with firmness by the strength

of the Lord, endured afflictions with patience, and did not shrink from death itself. The seed of their blood, sown as it were in the hearts of men, produced a harvest of new disciples. So the Christian religion spread more and more, and other religions having disappeared, it alone pervaded the West."

The above synopsis of the contents of the Tract will have shown, that it is almost entirely of a narrative and expository character, with very little of direct argument; and that the statements of Christian doctrines are chiefly given in the words of our Lord or His Apostles, prefaced by very brief explanations of their purport. For a summary of the evidences of Christianity, a theological statement of its doctrines, and some arguments to show that they are fitted to satisfy the highest aspirations of the Hindu mystic, I may refer to the "Course of Divine Revelation," lately published in English, Sanskrit, and Hindi, and to the Bengali version of the same work with additions, by the Rev. Krishna Mohan Banerjea.

J. M.

13*th January*, 1848.

## ॥ श्रीपरमेश्वरो जयति ॥

---

जगन्मोक्तुर्गुणान् गातु मुद्यत स्तनुवागहं ॥
सार्थां मनोहरां वाणी मर्थये परमेश्वरम् ॥ १ ॥
कंचिद् विदेशिशास्त्रज्ञं विद्वांसं बहुदर्शिनं॥
सत्यार्थी तरुणः कश्चिदुपसृत्येदमब्रवीत् ॥ २ ॥

॥ सत्यार्थ्युवाच ॥

भो आर्य कस्यचित् संज्ञा खृष्टाख्यस्य महागुरोः ॥
वारम्वारं मयाऽश्रावि मुखात् तस्याऽनुयायिनाम् ॥ ३ ॥
येषां तु सांप्रतं कीर्त्तिः सर्वं व्याप्नोति भूतलं ॥
तेषां महात्मनां वार्त्तां ज्ञातु मर्हन्ति पण्डिताः ॥ ४ ॥
अतो या खृष्टवृत्तान्ते जिज्ञासा जायते मम ॥
सा सर्वथा प्रशस्याऽस्ति नच निन्द्येति भाति मे ॥ ५ ॥
भवन्तं तच्चरित्रज्ञं ज्ञात्वा चाहमिहागतः ॥
तत्सारं श्रोतुमिच्छामि भवदीयाऽनुकम्पया ॥ ६ ॥

नृजातेर्भ्रंष्टयोः पित्रो रुत्पेदे सन्ततिर्यदा ॥
तदाऽसौ पैतृको दोष स्तत्स्वभावेऽप्यजायत ॥ २८ ॥
नृसङ्ख्यायां प्रवृद्धायां पातकं भृशमैधत ॥
बलात्कारेण गर्व्वेण सर्वा भूः पर्य्यपूर्य्यत ॥ २९ ॥
तदाऽऽततायिनां तेषामीशो दण्डं विनिर्णयन् ॥
जलप्लावेन भूमिष्ठान् सर्वान् जन्तूननाशयत् ॥ ३० ॥
नोहाख्यो धार्मिक स्त्वेकः परिवारयुतस्ततः ॥
महत्या नौकया तत्रे सर्वजन्तुयुगान्वितः ॥ ३१ ॥
तत्पश्चाच्छोषितास्वप्सु नोहपुत्त्रत्रयोद्भवाः ॥
मनुष्याः क्रमशो वृद्धा भुवि न्यूषु रितस्ततः ॥ ३२ ॥
आदौ तेष्वैश्वरं ज्ञानं तस्थौ सर्वत्र निर्मलं ॥
तदानीं चेश्वरस्याऽर्चा यथार्था प्राचलद् भुवि॥ ३३ ॥
पश्चात्त्वसन्मतैर्मिश्रं तज्ज्ञानं विकृतिं ययौ ॥
भ्रान्त्या स्वार्चामनर्च्याणां नराः कर्त्तुं प्रचक्रिरे ॥ ३४ ॥
द्युस्थानां ज्योतिषां दीप्त्या दिव्यया हि चमत्कृताः ॥
प्रभावं मेनिरे दैवं संस्थितं भास्करादिषु ॥ ३५ ॥
दृष्ट्वा चापारमम्भोधिं मद्रींश्च द्रुमशेखरान् ॥
भिन्ना स्तत्तदधिष्ठात्रीर्देवता अप्यकल्पयन् ॥ ३६ ॥
अमीषां क्रमशः पूजा कल्पितानां दिवौकसां ॥
अपुण्यरीतिसंयुक्ता व्याप सर्वत्र मेदिनीम् ॥ ३७ ॥
इत्थं परेश्वरस्याऽर्चा पुण्या प्रायो व्यलुप्यत ॥
तद्भक्तिजनितो धर्म स्त्वाह्रसद् भूमिमण्डले ॥ ३८ ॥

इत्थं क्षीणस्य धर्मस्य भूया दभ्युदयो नवः ॥
इतीच्छन्नीश्वरः स्वस्य ज्ञानं प्राकाशयत् पुनः ॥ ३९ ॥
इब्राहीमाभिधं साधुं स्वदेशा दाह्वयन् विभुः ॥
यं देक्ष्याम्यपरं देशं तत्र याहीत्युवाच तं ॥ ४० ॥
स विश्वासाऽन्वितो गेहं यथाऽऽज्ञप्तं त्यजन् निजम् ॥
गत्वा भूमिं कनानाख्यां तत्रोवास स्त्रिया सह ॥ ४१ ॥
भृशं चानुगृहीतेन तेन सार्द्धं परेश्वरः ॥
दयालुः संविदं चक्रे नानामङ्गलसंयुताम् ॥ ४२ ॥
तं वृद्धं वृद्धपत्नीकं निरपत्यमवग् विभुः ॥
स्त्री ते सविष्यते सूनुं महावंशपितामहं ॥ ४३ ॥
अस्मिन् निवासयिष्यामि देशेऽ संख्यं त्वदन्वयं ॥
सर्वे च त्वत्कुलद्वारा नराः प्राप्स्यन्ति मङ्गलं ॥ ४४ ॥
जज्ञे ततोऽचिरात् सूनुरिस्हाकाऽऽख्यः प्रतिश्रुतः ॥
सुताव् एसावयाकूबौ चेस्हाका दुद्भूवतुः ॥ ४५ ॥
याकूब स्त्विस्रयेलेति संज्ञां लेभे परेश्वरात् ॥
तस्य च द्वादशाऽभूवन् पुत्रा वंशपितामहाः ॥ ४६ ॥
पश्चाद् दुर्भिक्षहेतो स्ते त्यक्त्वा स्वं जन्मनीवृतं ॥
अवाग्दिग्वर्तिनं देशं मिसराख्यं ययुः समे ॥ ४७ ॥
तत्रोषित्वा कियत्कालं शुभे देशे सुतै र्वृतः ॥
वृद्धो ममार याकूबः प्राप्योदर्कस्य दर्शनं ॥ ४८ ॥
मृतेः प्राक् स्वीयवंश्यानां भावि भाग्य मुवाच सः ॥
यिह्वदाख्यं च पुत्रं स्वमुद्दिश्येदं वचोऽब्रवीत् ॥ ४९ ॥

आसीत् सहस्रवर्षेभ्यो विक्रमार्कशकात् पुरा ॥
तद्देशे भूपतिर्दाविदाख्यो भक्तोऽर्चको विभोः ॥ ७२ ॥
स्ववंशयमहिमोद्देशे स्वकुले चोद्भविष्यतः ॥
नृत्रातुर्विषये प्राप्नोत् स प्रतिज्ञां प्रभोरिमां ॥ ७३ ॥
त्वद्वंशः शाश्वतं स्थाता त्वद्राजत्वं च सन्ततं ॥
सिंहासनं च ते वेत्ता दृढीभूतं सनातनम् ॥ ७४ ॥
उदर्कं प्राप्तदृष्टिस्तु स्वयं दाविदसौ कविः ॥
नाना गीतेषु भव्यस्य नृत्रातुः प्रजगौ यशः ॥ ७५ ॥
तत्पश्चात् क्रमशोऽन्येऽपि यह्रद्या भव्यवादिनः ॥
भव्यं प्रादुर्भवं तस्य प्रोचुरीश्वरशिक्षिताः ॥ ७६ ॥
तेषाम् इषाय नामैको विशेषेण प्रसिध्यति ॥
यः सार्द्धद्विशताब्देभ्यो दाविद्राजा दनूदभूत् ॥ ७७ ॥
स ईश्वरार्पितज्ञानद्योतितान्तरलोचनः ॥
स्त्रष्टस्यैश्वर्यमानुष्ये पश्यन्नेव मवर्णयत् ॥ ७८ ॥

॥ इषाय उवाच ॥

अस्मभ्यं जायते तोक मस्मभ्यं दीयते सुतः ॥
धुरं राज्याऽधिकारस्य यः स्वस्कंधे धरिष्यति ॥ ७९ ॥
स बाल स्त्वाद्भुतो मन्त्री शक्तिमा नीश्वरोऽपि च ॥
आनन्त्यजनकः सन्धिनाथ स्त्वेत्यभिधास्यते ॥ ८० ॥
दाविद्राजाऽऽसनस्थस्य तस्य राज्यं सदैधिता ॥
सन्धराढ्यं न्यायधर्माभ्यां दृढीभूतोदयस्थिति ॥ ८१ ॥

॥ गुरुरुवाच ॥

पुनश्च भाविनीं वार्त्तां व्यतीताम् इव कल्पयन् ॥
इषायस्तस्य मत्त्यार्थं दुःखभोगमवर्णयत् ॥ ८२ ॥

॥ इषायउवाच ॥

आसीत् स क्लेशभाग् दुःखी मनुष्यैश्च तिरस्कृतः ॥
परंत्वस्माक मेवासौ दुःखं सेहे न चाऽऽत्मनः ॥ ८३ ॥
स ईश्वेनाहतः क्लिष्ट श्चेत्यस्माभि रमन्यत ॥
परंतु वस्तुतोऽसौ नो दोषहेतो रहन्यत ॥ ८४ ॥
अस्माकमेव रक्षायै तेन शास्तिरभुज्यत ॥
तद्भुक्तात् ताडनाच्चैव वयं स्वास्थ्यं लभामहे ॥ ८५ ॥
वयं स्वेच्छाऽनुसारेण सर्वे भ्रान्ता बभूविम ॥
वयं त्वार्हाम यां शिष्टिं तामीशोऽमुमभोजयत् ॥ ८६ ॥
तीव्रं क्लिष्टोऽप्यसौ सेहे नच किंचिदभाषत ॥
बधाय नीयमानोऽविरिव तस्थौ स नीरवः ॥ ८७ ॥
स प्राणां श्चापि तत्याज परपापधुरंधरः ॥
स्वयं च दोषिणां मध्ये दोषहीनोऽप्यगण्यत ॥ ८८ ॥
आत्मानं तु बलिं दत्त्वा दुःखभोगादनंतरं ॥
स्वजन्यमन्वयं पश्यन् चिरजीवी स तप्स्यति ॥ ८९ ॥
यतोऽसौ मामको धर्मी सेवकः परदण्डभाक् ॥
स्वस्य ज्ञानेन भूयिष्ठान् मनुष्यान् शोधयिष्यति ॥ ९० ॥

अतस्तस्मै प्रदास्यामि भागं सार्द्धं महात्मभिः ॥
वीरै र्महाबलैः साक मसौ लोप्त्रं विभच्चयति ॥ ९१ ॥

॥ गुरुरुवाच ॥

इत्थायादचिरं पश्चाद् मीकाऽऽख्यो भव्यवाचकः ॥
एवं प्रकाशयामास सुभं जन्मस्थलं प्रभोः ॥ ९२ ॥

॥ मीक उवाच ॥

हे त्वं यहूदिदेशीये पुरि वेथ्लहमफ्रते ॥
यहूदिनां सहस्रेषु किं लघुत्वेन गण्यसे ॥ ९३ ॥
इस्रायेलाऽधिपो भावी त्वन्मध्याद् निःसरिष्यति ॥
परंतु पूर्वतोऽप्यासीदनादि स्वास्य निःसृतिः ॥ ९४ ॥

॥ गुरुरुवाच ॥

सार्द्धपञ्चशताब्देभ्यः श्रीख्रिष्टस्यागतेः पुरा ॥
आचार्यो दानियेलाऽऽख्यः प्रोचे कालं तदागतेः ॥ ९५ ॥
स्वर्दूतो गाब्रियेलाऽऽख्य स्तत्समीपे ह्युपस्थितः ॥
तमीश्वरप्रियं भव्यां वार्त्ता मेव प्रदर्शयत् ॥ ९६ ॥

॥ गाब्रियेल उवाच ॥

रोधनायाऽपराधानां यज्ञानां च समाप्तये ॥
पापस्य शोधनार्थाय नित्यधर्मप्रवृत्तये ॥ ९७ ॥

समाप्त्यै भव्यवक्तॄणां सुपुण्यस्याऽभिषिक्तये ॥
इत्येतत् सर्वसिद्ध्यर्थं पवित्रे तावके पुरे ॥
सप्ताहसप्ततिं कालं विजानीहि निरूपितम् ॥ ९८ ॥
पुनर्यिरूशलीम्पुर्य्यां निर्मित्यै शासनाऽवधि ॥
मसीहकालपर्यन्तं स्यात् सप्ताहोनसप्ततिः ॥ ९९ ॥
हनिष्यते मसीहोऽसा वात्मनो नतु हेतवे ॥ १०० ॥

॥ गुरुरुवाच ॥

अमीषां भव्यवक्तॄणां संपूर्णा ग्रन्थसंहिता ॥
यहूदिन्या कृता वाण्या प्रचलत्यधुनावधि ॥ १०१ ॥
श्रीख्रीष्टस्याऽवतारात् प्राक् प्रायो वर्षशतत्रयात् ॥
तद्ग्रन्थसंग्रहस्यार्थो यावन्याऽरचि भाषया ॥ १०२ ॥
ततो महात्मन स्तस्य प्रतीच्या बहुजातिषु ॥
इस्रायेलीयभिन्नासु स्तोकं स्तोकमजायत ॥ १०३ ॥
तदा पाश्चात्यलोकेषु यवना रोमिणोऽपिच ॥
गुणै र्महोन्नतिं प्राप्य व्यश्रूयन्त कुमण्डले ॥ १०४ ॥
देशेषु परितःस्थेषु क्रमशस्त्र प्रणादितः ॥
तेषां कीर्त्तेः प्रतिध्वानः सुश्रुवेऽचापि भारते ॥ १०५ ॥

तथा च महाभारते ॥ सर्वज्ञा यवना राजन् शूराश्चैव विशेषत इति ॥

परंतु सर्वविज्ञानपरिष्कारयुतेष्वपि ॥
तद्देशिष्वैश्वरं ज्ञानं सर्वोत्कृष्ट मदूष्यत ॥ १०६ ॥
जनाः साधारणाः सत्यं ह्यजानन्तः परेश्वरम् ॥
अनर्च्यान्बहूलान्देवान् अभ्यार्चन्मोहकल्पितान् ॥ १०७ ॥
विज्ञास्त्र परमार्थादेर्मर्मजिज्ञासवो वृथा ॥
शास्त्राऽभावात् स्वया बुद्ध्या तत्त्वं गन्तुं चिचेष्टिरे ॥ १०८ ॥
किंत्वैशशास्त्रधर्त्तारो यहूदाः परदेशगाः ॥
बहूच स्वस्य शास्त्रस्य सर्वमर्थं वितस्तरुः ॥ १०९ ॥
इत्थं भविष्यत स्त्रातुः प्रतीच्यां विस्तृता कथा ॥
अनेकै र्जगृहे सद्भि रनुभूय स्वदुर्दशां ॥ ११० ॥
यथा प्रतीच्यलोकेषु तथा प्राच्येऽच भारते ॥
च्चिता वैशावतारस्य मत माश्रिश्रिये सदा ॥ १११ ॥
यथा भगवद्गीतायां । यदा यदा हि धर्मस्य ग्लानिर्भवति
भारत । अभ्युत्थानमधर्मस्य तदाऽऽत्मानं सृजाम्यहं ।
परित्राणाय साधूनां विनाशाय च दुष्कृतां ।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥ इति ॥
इति श्रीयेषूख्रीष्टमाहात्म्ये श्रीमहामोक्तृप्रतीक्षा नाम
प्रथमोऽध्यायः ॥

॥ गुरुरुवाच ॥

यस्याऽऽगमांशुभिः पूर्वं नभोऽभूदरुणीकृतं ॥
स प्राङ्निरूपिते काले उदैद् धर्मप्रभाकरः ॥ १ ॥

यहूद्यानामके देशे दाविद्राजाऽन्वयोद्भवा ॥
मरीयानामिका काचित् कुमारी न्यवसत् सती ॥ २ ॥
गते वैक्रमशाकस्य पंचाशत्तमहायने ॥
ता मीश्वप्रेषितो दूत उपस्थित्येद मब्रवीत् ॥ ३ ॥

॥ गाब्रियेलो दूत उवाच ॥

हे भूर्यनुग्रहाऽऽपन्ने कन्ये भूया च्छुभं तव ॥
ईश्वरस्ते सहायोऽस्ति धन्या त्वं स्त्रीगणेषु च ॥ ४ ॥

॥ गुरुरुवाच ॥

सा कन्या वचनात् तस्य व्याकुलैव मचिन्तयत् ॥
एतत् संबोधनं कीदृ गित्यथो सोऽब्रवीत् पुनः ॥ ५ ॥

॥ गाब्रियेल उवाच ॥

माभैषीर्हे मरीये त्वं ह्याप्तो रीशादनुग्रहं ॥
त्वं गर्भधारिणी भूत्वा धन्या पुत्रं सविष्यसे ॥ ६ ॥
स येषूनामको भावी महान् सर्वेश्वरात्मजः ॥
राजा याकोबवंशस्य सच शश्वद् भविष्यति । ७ ॥

॥ गुरुरुवाच ॥

एतच्छ्रुत्वा मरीयोचे कथमेतद् भवेन् मम ॥
पुंसंसर्गो ह्वि नास्तीति ततो दूतोऽब्रवीत् पुनः ॥ ८ ॥

॥ गाब्रियेल उवाच ॥

पवित्र ईश्वरस्यात्मा कन्ये त्वामाश्रयिष्यति ॥
सर्वेश्वरस्य शक्तिश्च छायां कर्त्ता तवोपरि ॥ ९ ॥
अतस्त्वद्गर्भतो बालो यः पवित्रो जनिष्यते ॥
सूनुः परेश्वरस्येति स महात्माऽभिधास्यते ॥ १०॥

॥ गुरुरुवाच ॥

मरीया तु ततोऽवादीदीशदास्यां तथा मयि ॥
संसिद्धं ते वचोस्त्वित्थं दूत स्त्वंतरधीयत ॥ ११ ॥
योसेफः सज्जनः कश्चित् तदासीत् तत्र नीवृति ॥
तस्मै साध्वीतमा कन्या वाग्दत्ता प्रागविद्यत ॥ १२ ॥
ततस्तां गर्भिणीं दृष्ट्वा व्यभिचारस्य शंकया ॥
योसेफो गर्भहेतवज्ञो वर्जितुं तामकल्पयत् ॥ १३ ॥
एतच्चिन्तयमानस्तु व्याकुलात्मा स धार्मिकः ॥
स्वप्ने दृष्ट्वा विभोर्दूतं तस्याऽऽज्ञामशृणोदिमां ॥ १४ ॥

॥ दूत उवाच ॥

हे दावित्पुत्र योसेफ त्वं मा वर्जात्मनः स्त्रियं ॥
तद्गर्भो ह्यद्भुतः शक्त्या पवित्रस्याऽऽत्मनोऽभवत् ॥ १५ ॥

॥ गुरुरुवाच ॥

इत्यैशदूतवाक्येन निर्मलां तां व्युवाह सः ॥
आश्चर्यगर्भधारिण्या नासजत्तु तया सह ॥ १६ ॥

किंचित्कार्यवशात् पश्चात् पुरे वेथ्लहमाभिधे ॥
दाविज्जन्मस्थले ताभ्यां गन्तव्यं स्वगृहादभूत् ॥ १७ ॥
तत्पुर्यां पान्थशालाया माकीर्णायां जनैः क्वचित् ॥
प्राप्तप्रसूत्यनेहस्का कन्या नाप्नोत् स्थलं सती ॥ १८ ॥
तत्रत्यमन्दुरायां तु स्थानमंत्यमवाप्य सा ॥
भविष्यद्वादिभिः प्रोक्तं कुमारी सुषुवे सुतं ॥ १९ ॥
विवेष्टे विश्वसम्राजं चामुं वस्त्रैरराजकैः ॥
पशुभोजनपात्रे च सर्वभूतेशमार्पयत् ॥ २० ॥
तदा तन्निकटे चेत्रे कतिचिद् मेषपालकाः ॥
रात्रौ जागरिणोऽवीनां स्वेषां रक्षामकुर्वत ॥ २१ ॥
तत्रैतेषु महातेज ऐश्वरं पर्यभासत ॥
बिभ्यत्सूपस्थितस्त्वैको दूत ऐशोऽब्रवीदिदं ॥ २२ ॥

॥ दूत उवाच ॥

अहो माभैष्ट भद्रं हि समाचारं ददामि वः ॥
ख्रष्टोऽद्य दाविदः पुर्य्यां त्रातोत्पेदे महाप्रभुः ॥ २३ ॥

॥ गुरुरुवाच ॥

इत्थं सत्यऽमुना प्रोक्ते सद्यो नाकादुपस्थिता ॥
स्वर्दूतानां चमूरेता मीश्वरस्य स्तुतिं जगौ ॥ २४ ॥

॥ स्वर्दूता ऊचुः ॥

स्वर्वासयोघेषु माहात्म्य मीश्वरस्य प्रकाशतां ॥
शान्ति र्भूयात् पृथिव्यान्तु नृजातौ च प्रसन्नता ॥ २५ ॥

॥ गुरुरुवाच ॥

इति गीत्वैश्चदूतानां चमूः खेऽन्तरधीयत ॥
गत्वा च मेषपालौघो प्राप सद्वाक्यदर्शनं ॥ २६ ॥

॥ शिष्य उवाच ॥

योऽवतीर्णो नृरूपेण ज्ञातोऽसौ कथमीश्वरः ॥
कथमीशात्मजस्येति कृपया वद मे गुरो ॥ २७ ॥

॥ गुरुरुवाच ॥

जयाह यस्तदा जन्म मर्त्यावस्थां च दुःखिनीम् ॥
अनन्तो महिमा तस्य तच्छिष्यै रिति कथ्यते ॥ २८ ॥

॥ यथा योहन्निः ॥

शब्दोऽविद्यत विश्वादावीश्वरेण सह स्थितः ॥
स्वयं सन्नीश्वरोऽनादिः ससृजे तेन चाखिलं ॥ २९ ॥
स योनिर्जीवनस्यासीज्ज्योतिर्दो नृगणस्य च ॥
स चकाशे तमोमध्ये न जयाह तम स्त्वमुं ॥ ३० ॥
स शब्दस्साधरद्दे देहं नृणां मध्येऽप्युवास च ॥
ईशात्मजार्हतेजस्कः सत्याऽनुग्रहयोर्निधिः ॥ ३१ ॥
पितृक्रोडस्थितः सूनु रद्वितीयोऽयमीश्वरम् ॥
अदृष्टं व्यञ्जयामास प्रादुर्भूय महीतले ॥ ३२ ॥

स संसारस्य निर्माता तन्मध्येऽवातरत् स्वयं ॥
मायो मूढस्तु संसार स्तं न पर्यचिनोत् प्रभुं ॥ ३३ ॥
तन्माहात्म्यन्तु यावन्तः परिचित्य तमाश्रयन् ॥
तेभ्योऽधिकार मीश्वस्य सूनवो भवितुं ददौ ॥ ३४ ॥

॥ गुरुरुवाच ॥

यथा वा पौलनामाऽन्यः ख्रीष्टशिष्यः प्रतिष्ठितः ॥
ऐश्वर्य ममितं स्वस्य प्रभोरेव मवर्णयत् ॥ ३५ ॥

॥ पौल उवाच ॥

अदृष्टस्येश्वरस्याऽयं मूर्त्तिर्विश्वाऽग्रजः सुतः ॥
तावद्धि ससृजे तेन भूमिष्ठं खस्थितं च यत् ॥ ३६ ॥
तद्द्वारा ससृजे विश्वं तथा तस्यैव हेतवे ॥
अग्रे स चैव विश्वेषां सर्वं तेनाऽवतिष्ठते ॥ ३७ ॥
स त्वीश्वरस्वरूपोऽपि स्वमैश्वर्यं त्यजन्निव ॥
दासस्वरूपको भूत्वा मर्त्याऽवस्थां समाददे ॥ ३८ ॥
इत्यादिना ।

॥ गुरुरुवाच ॥

ततः स बालकः पुण्यो वासरे जन्मतोऽष्टमे ॥
संस्कारं मोसिशास्त्रोक्तं येषूनाम च लब्धवान् ॥ ३९ ॥
स च गाढे जगद्ध्वान्ते धर्मार्कस्योदयः शुभः ॥
लोकाच्चिराय गुप्तोऽपि सद्भि रल्पै रदृश्यत ॥ ४० ॥

प्राच्यां हि पण्डिताः केचित् श्रीयेषूजन्मसूचिकां ॥
दृष्ट्वैका मद्भुतां तारां वन्दितुं तं प्रतस्थिरे ॥ ४१ ॥
सा ताराऽग्रे प्रगच्छन्ती तदीयाध्वोपदेशिका ॥
यत्रैश्वरः शिशुस्तस्थौ तत्रान्ते स्थगिताऽभवत् ॥ ४२ ॥
ततो गृहे तदुद्दिष्टे प्रविशन्तो विपश्चितः ॥
नाना सत्कृत्य सद्बाल मुपहारै र्ववन्दिरे ॥ ४३ ॥
पण्डितानां गतेः पश्चाच् चत्वारिंशद्दिनाऽऽयुषं ॥
स्वबालं जननी नीत्वा राजधानीं समागमत् ॥ ४४ ॥
तत्रत्ये मन्दिरे सूनुं चेश्वराय समार्पयत् ॥
बलीन् यहूदिशास्त्रोक्तान् समुत्सृज्य यथाविधि ॥ ४५ ॥
तद्देशे यस्तदा भूभृदासीद् हेरोदसंज्ञकः ॥
स येषूत्पत्तिवृत्तान्त माकर्ण्य व्याकुलोऽभवत् ॥ ४६ ॥
यो भव्यवक्तृभिः प्रोक्तो भावी राजा यहूदिनाम् ॥
राज्यं मे सोऽधुना जातः शीघ्रमेव हरेदिति ॥ ४७ ॥
इत्थं विचिन्त्य बालं तु न प्राप्याज्ञां ददा वसौ ॥
द्विवर्षोनान् शिशून् सर्वान् हन्तुं बेथ्लहमान्तिके ॥ ४८ ॥
स बाल स्त्वैश्वरो येषूः स्वर्दूतस्याऽऽज्ञया ततः ॥
नीतो देशान्तरं तत्रे स्वदेशं चागमत् पुनः ॥ ४९ ॥
एकदा द्वादशाब्दायु र्यदाऽभूत् स विभोःसुतः ॥
तदा मात्राऽन्वितोऽगच्छत् पर्वकाले महापुरं ॥ ५० ॥
पर्वान्ते तस्य पित्रोस्तु पुरात् प्रस्थितयोर्गृहं ॥
न सार्द्धं मगमद् येषूः पुरे तस्थौ तु सोऽद्भुतः ॥ ५१ ॥

स कश्चिद् यात्रिणां मध्ये सुहृदा सह केनचित् ॥
आगच्छतीत्यजानीतां निश्चिन्तौ पितरौ पथि ॥ ५२ ॥
शेषे तु तं कश्चिद् नाप्त्वा परावृत्तौ महापुरं ॥
प्रापतु स्त्रिदिनात् पश्चाद् मन्दिरे परमात्मनः ॥ ५३ ॥
तत्र तं तौ समासीनं शास्त्रिणां सदसोऽन्तरे ॥
अविन्दतां निशाम्यन्तं प्रश्नान् पृच्छन्तमेव च ॥ ५४ ॥
ये ये न्यशामयं स्तत्र तस्योक्तीरुत्तराणि च ॥
ते सर्वे तन्महाबुद्धे विंस्मयं परमं ययुः ॥ ५५ ॥
माता तूवाच हे पुत्र कस्मादेवं समाचरः ॥
त्वा मन्वैच्छाव शोकार्ता वहं तातश्च तावकः ॥ ५६ ॥
इत्यूचेऽर्यतमा स्त्रीणां किंतु मृद्वपि भर्त्सनं ॥
तदनर्हा निशम्योच एकः स्त्रीभूषु सोऽनघः ॥ ५७ ॥

॥ श्रीयेषूरुवाच ॥

मां कुतोऽन्वैच्छतं व्यग्रौ कार्यं स्वस्य पितुर्मया ॥
कर्त्तव्यमस्ति किं नेत्थ मजानीतं युवां पुरा ॥ ५८ ॥

॥ गुरुरुवाच ॥

इत्याश्चर्यवचः प्रोक्त मीश्वरस्यैकसूनुना ॥
अव्यक्तार्थं निशाम्यन्तौ पितरौ नावजग्मतुः ॥ ५९ ॥
पिता तु तव कोऽस्तीति कार्यं वा तस्य किंविधं ॥
तदानीं कोऽपि नापृच्छदमुं बालक मद्भुतम् ॥ ६० ॥

तत स्ताभ्यां सहाऽऽगत्य नद्यरेतपुरं पुनः ॥
तस्थौ निघ्न स्तयोर्येषूः सिद्धः सोऽसिद्धयोरपि ॥ ६१ ॥
ततो दिनेदिने येषू र्ववृधे धिषणाऽऽदिषु ॥
प्रसादमीश्वराद् नृभ्य श्चावाप्नोदुत्तरोत्तरम् ॥ ६२ ॥
इति श्रीयेषूख्रष्टमाहात्म्ये येषूत्पत्तिवर्णनं नाम
द्वितीयोऽध्यायः ॥

---

॥ गुरुरुवाच ॥

आजन्मनोऽपि सर्वज्ञः सर्वशक्ति र्विभोः सुतः ॥
त्रिंशद्वर्षवयो यावद् नह्याचार्य्यत्व माददे ॥ १ ॥
तत्प्रादुर्भवनात् पूर्वं तन्महिम्नः प्रसिद्धये ॥
योहन्निनामकः साधुरीश्वरेण न्ययोज्यत ॥ २ ॥
स ऐश्वचसाऽऽविष्टः परिभ्राम्य न्नघोषयत् ॥
हे पश्चात्तपत स्वर्गसाम्राज्यं ह्यायथाविति ॥ ३ ॥
प्रादुर्भविष्यतः शीघ्र मीशसूनोर्महाप्रभोः ॥
माहात्म्यसूचकं वाक्यमिदं योहन्निरब्रवीत् ॥ ४ ॥

॥ योहन्निरुवाच ॥

अहं वो नीरमात्रेण संस्करोम्यय्यतःसरः ॥
प्रभु स्त्वायाति यत्पादौ वोढुं नार्हो भवाम्यहं ॥ ५ ॥
आयास्यन्नपि मत्पश्चात् स मत्पूर्व मविद्यत ॥
पवित्रेणाऽऽत्मना युष्मान् संस्कर्ता सोऽनलेन च ॥ ६ ॥

तत स्ताभ्यां सहाऽऽगत्य नज्ञरेतपुरं पुनः ॥
तस्थौ निघ्न स्तयोर्येषूः सिद्धः सोऽसिद्धयोरपि ॥ ६१ ॥
ततो दिनेदिने येषू र्ववृधे धिषणाऽऽदिषु ॥
प्रसादमीश्वरात् नृभ्य श्चावाप्नोदुत्तरोत्तरम् ॥ ६२ ॥

इति श्रीयेषूख्रष्टमाहात्म्ये येषूत्पत्तिवर्णनं नाम
द्वितीयोऽध्यायः ॥

---

॥ गुरुरुवाच ॥

आजन्मनोऽपि सर्वज्ञः सर्वशक्ति र्विभोः सुतः ॥
त्रिंशद्वर्षवयो यावद् नह्याचार्य्यत्व मादृदे ॥ १ ॥
तत्प्रादुर्भवनात् पूर्वं तन्महिम्नः प्रसिद्धये ॥
योहन्निनामकः साधुरीश्वरेण न्ययोज्यत ॥ २ ॥
स ऐशवचसाऽऽविष्टः परिभ्राम्य न्वघोषयत् ॥
हे पश्चात्तपत स्वर्गसाम्राज्यं ह्यायया विति ॥ ३ ॥
प्रादुर्भविष्यतः शीघ्र मीशसूनोर्महाप्रभोः ॥
माहात्म्यसूचकं वाक्यमिदं योहन्निरब्रवीत् ॥ ४ ॥

॥ योहन्निरुवाच ॥

अहं वो नीरमात्रेण संस्करोम्यथ्यतःपरः ॥
प्रभु स्त्वायाति यत्पादौ वोढुं नार्हो भवाम्यहं ॥ ५ ॥
आयास्यन्नपि मत्पश्चात् स मत्पूर्वं मविद्यत ॥
पवित्रेणाऽऽत्मना युष्मान् संस्कर्ता सोऽनलेन च ॥ ६ ॥

शूर्पपाणिः कुसूलेऽसौ शस्यं प्रस्फोट्य चेष्यति ॥
तुषं तु वह्निना सम्य गनिर्वाणेन धक्ष्यति ॥ ७ ॥

॥ गुरुरुवाच ॥

तत स्त्रिंशत्समायुष्को भूत्वा येषू र्महाप्रभुः ॥
योहन्नेः सन्निधिं प्राप लिप्सुः कीलालसंस्कृतिं ॥ ८ ॥
उपस्थितं त्वमुं दृष्ट्वा नम्रात्माऽग्रसरः प्रभुं ॥
अनेन भाषितेनामुं निषिषेध समादरं ॥ ९ ॥

॥ योहन्निरुवाच ॥

भवत्कृता मया योग्या लब्धुं कीलालसंस्कृतिः ॥
कथं त्वं मत्कृतं नीरसंस्कारं प्राप्तु मर्हसि ॥ १० ॥

॥ श्रीयेषूरुवाच ॥

मया यथेप्सितं तद्वदिदानीं क्रियता मिदम् ॥
एवं हि साध्य मस्माभिः समस्तं धर्ममण्डलं ॥ ११ ॥

॥ गुरुरुवाच ॥

तच्छ्रुत्वाऽग्रसरो वाक्यं तत्क्षणाद् अनुरुध्य च ॥
स्नानेन संस्करोतिस्म मलाऽस्पृष्ट मपि प्रभुं ॥ १२ ॥
यदा तु सरितो येषूः संस्कृतो वहिरागमत् ॥
तदा भिन्न मिवाकस्मादन्तरीक्ष मदृश्यत ॥ १३ ॥

तस्योपरीश्वरस्यात्मा संपपात कपोतवत् ॥
वाणी चैतादृशी नाका दागच्छन्ती न्यशम्यत ॥ १४ ॥

॥ श्रीस्वयंभूरुवाच ॥

मदीय आत्मजन्माऽयं विद्यते परमप्रियः ॥
एतस्मिन्नेव सन्तोषो मामको विद्यतेऽपि च ॥ १५ ॥

॥ गुरुरुवाच ॥

पश्चाद् भद्रस्य योहन्नेः कीर्त्तिः सर्वत्र विस्तृता ॥
प्रधानयज्वनां कर्णं शेषे प्राप यहूदिनां ॥ १६ ॥
किमेषोऽसौ महात्राता प्रतश्चाख्योदितो न वा ॥
इत्थं जिज्ञासवस्ते तं प्रष्टुं दूतान् समैरयन् ॥ १७ ॥
तैः पृष्टः सोऽब्रवीद् नाहमसौ खृष्टः प्रतिश्रुतः ॥
तदागमप्रचाराय तदग्रे प्रेषितस्त्विति ॥ १८ ॥
येशूं परेद्युरायान्तं पश्यन् प्रोवाच सोऽग्रगः ॥
अहो ऐशोऽविवत्सोऽयं जगत्पापहरोऽमलः ॥ १९ ॥
येष्वस्य विषये पृष्टः स्वशिष्यैः स्वस्य लाघवं ॥
स्वप्रभो र्महिमानं च पुन र्योहन्निरुक्तवान् ॥ २० ॥

॥ योहन्निरुवाच ॥

न प्राप्तुं शक्यते किंचिद् यदीशेन न दीयते ॥
न खृष्टाख्योऽभिषिक्तोऽहं तदग्रे त्वहमीरितः ॥ २१ ॥

इतश्चाहं ह्रसिष्यामि सदा वर्द्धिष्यते त्वसौ ॥
ऊर्द्ध्वाद् यो ह्यवरूढोऽस्ति सर्वश्रेष्ठः स विद्यते ॥ २२ ॥
यमीशः प्रैरयद् नाकात् स ब्रवीत्यैश्वरीर्गिरः ॥
पवित्रेणाऽऽत्मनाऽऽविष्टो प्राप्तामुचिकदर्शनः ॥ २३ ॥
अद्वितीये सुते स्वस्य प्रीयते हि पितेश्वरः ॥
विश्वाधिकार मन्यूनं तत्करे च समार्पयत् ॥ २४ ॥
पुत्रे प्रत्येति यः कश्चिद् स नित्यं जीव माप्नुयात् ॥
अविश्वासास्तु भोच्यन्ते कोपमैश्वर मव्ययं ॥ २५ ॥

॥ गुरुरुवाच ॥

अथ स्वस्याऽग्रगेनेत्थ मभिषिक्तः स्तुतोऽपिच ॥
श्रीयेषूः कर्मणि स्वीये समारेभे प्रवर्त्तितुं ॥ २६ ॥
ततश्च सोऽखिलं देशं यहूदीयं परिव्रजन् ॥
नूत्नस्य धर्मराज्यस्य वार्त्ता मेव मघोषयत् ॥ २७ ॥

॥ श्रीयेषूरुवाच ॥

संपूर्णोऽस्त्यधुना कालो राज्य मैश्व मुपैति च ॥
अतोऽनुतप्य संवादं प्रतीतेमं सुमंगलं ॥ २८ ॥

॥ गुरुरुवाच ॥

महाशक्त्यन्विते र्वाक्यैर्मार्द्दवेन परेण च ॥
स नॄन् प्रवर्त्तयामास परमार्थस्य चिन्तने ॥ २९ ॥

ऐश्वशास्त्रप्रचाराय वस्तुतस्त्व न्ययोजि सः ॥
इत्यस्य सिद्धयेऽगण्याः सोऽकार्षीदद्भुताः क्रियाः ॥ ३० ॥
अशेषं तत्क्रियासंघं नात्र वक्ष्यामि विस्तरात् ॥
जिज्ञासो स्तव तुष्ट्यै तु दास्ये किंचिन्निदर्शनम् ॥ ३१ ॥
यथा । तं कश्चिदेकदा कुष्ठी नमस्कृत्यैवमार्थयत् ॥
चेदिच्छे स्तर्हि मां शुद्धं कर्त्तुं शक्नोषि भो प्रभो ॥ ३२ ॥
इति श्रुत्वा प्रभुः पाणिं स्वं प्रसार्य तमस्पृशत् ॥
उवाच चाहमिच्छामि त्वं पवित्रो भवेरिति ॥ ३३ ॥
तत्क्षणात् तस्य वाक्यस्य प्रभावात् कुष्ठिनो वपुः ॥
दारुणाद् मुमुचे रोगात् सद्यः शुद्धं बभूव च ॥ ३४ ॥
अन्येद्युरन्वितो व्यूहै र्यैषूर्यात्रां यदाऽकरोत् ॥
तदा द्वौ मार्गपार्श्वेऽन्धा वासातां भिक्षुकौ स्थितौ ॥ ३५ ॥
नराणां गच्छतां शब्दं शृण्वन्तौ भिक्षुका वमू ॥
पप्रच्छतुः समीपस्थान् कुतो व्यूह इयानिति ॥ ३६ ॥
श्रीयेषूरत्र यातीति ज्ञापितौ तावनर्दताम् ॥
हे येषू दाविदुत्पन्न दयां कुर्वावयोरिति ॥ ३७ ॥
तत्रस्थ स्तौ तदा व्यूह स्तूष्णीं भवितु मादिशत् ॥
ततोऽपि त्वधिकं प्रोच्चैर्भर्त्सिता वप्यनर्दताम् ॥ ३८ ॥
तदार्त्तनाद माकर्ण्य दाविद्भूः करुणामयः ॥
स्थित्वा दृष्ट्युत्सुकौ दीनौ स्वस्य साक्षात् समाह्वयत् ॥ ३९ ॥
सद्य स्तयोः प्रभोः प्रान्ते दृष्टिदातुरुपेतयोः ॥
पूर्वं तदाशयज्ञोऽपि श्रीयेषूरिदमब्रवीत् ॥ ४० ॥

अहं किं वां कृते कुर्य्याम् इति किं वाञ्छथो युवां ॥
इत्यस्य चोत्तरं प्राप दृष्टि रेवेष्यते प्रभो ॥ ४१ ॥
ततोऽनुकम्पयाऽऽविष्ट स्तन्नेत्राणि स्पृशन् प्रभुः ॥
अवादीत् प्राप्नुतं दृष्टिं विश्वासो वां ह्यमोचयत् ॥ ४२ ॥
अतः प्राप्तेक्षणौ सद्यो येषूं मार्गेऽन्वगच्छताम् ॥
व्यूहा स्त्वेतां क्रियां दृष्ट्वा तुष्टुवुः परमेश्वरम् ॥ ४३ ॥
अन्येद्यु र्धन्वनि व्यूहो महान् संजगृहे यदा ॥
तदा सायं प्रभुं शिष्या उपसृत्येद मब्रुवन् ॥ ४४ ॥
प्रभोऽत्र निर्जनं स्थानं गतः प्रायश्च वासरः ॥
ग्रामेष्विमान् जनान् गन्तुं भोजनक्रीतये नुद ॥ ४५ ॥
इत्थं श्रुत्वाऽऽदिशद् येषूः कल्पयन्नद्भुतां क्रियाम् ॥
युष्माभि र्दीयतां भक्ष्यं न तैरन्यत्र गम्यताम् ॥ ४६ ॥
पूपांस्तु पञ्च कस्माच्चित् प्राप्य द्वौ च झषौ प्रभुः ॥
भूमौ तत्र नृणां पञ्चसहस्राणि समासयत् ॥ ४७ ॥
ऊर्द्ध्वास्यश्च ततःस्थित्वा वन्दित्वा च परेश्वरम् ॥
पूपान् मीनांश्च शिष्येभ्यः परिवेषयितुं ददौ ॥ ४८ ॥
तथा कृतेतु यावन्तो नरा बालाः स्त्रियोऽपि च ॥
तदाऽऽसंस्तत्र तावन्तो भुक्त्वाऽतृप्यन् समन्ततः ॥ ४९ ॥
सुतृप्तेषु त्वशेषेषु स्वशिष्यान् पोषकोऽवदत् ॥
चीयन्तां शेषखण्डानि मा कस्यापि क्षयोऽस्त्विति ॥ ५० ॥
तदादेशाऽनुसारेण शेषखण्डमहाचयम् ॥
गृहीत्वा पूरयामासुः शिष्या द्वादशडल्लकान् ॥ ५१ ॥

एतद् दृष्ट्वा महाकर्म प्रोचु स्तत्रस्थिता जनाः ॥
शास्त्रोक्तो यो महाचार्य्यः सोऽस्त्ययं सुतरामिति ॥ ५२ ॥
भूतानां चोपसर्गेण पीडितान् बहुलान् जनान् ॥
श्रीयेषू र्मोचयामास भूतविक्रमभंजनः ॥ ५३ ॥
भूतेनाविविष्टे पुत्री यस्याः स्त्री काचिदीदृशी ॥
विदेशीयैकदा येषू मभिगत्येदमार्थयत् ॥ ५४ ॥

॥ विदेशिन्युवाच ॥

करुणां कुरु दीनायां मयि हे दाविदुद्भव ॥
पुत्री दुष्टेन भूतेन मामिका पीड्यते यतः ॥ ५५ ॥

॥ गुरुरुवाच ॥

इत्यार्त्तनाद मेतस्या दुःखिताया निशम्य तु ॥
श्रीयेषू रुत्तरं किंचिदपि तस्यै न दत्तवान् ॥ ५६ ॥
शिष्यैस्तु प्रार्थितः स्वामिन् एषा नारी विसर्ज्यताम् ॥
सा ह्यस्मां स्वलतो ऽन्वेति नर्दन्तीत्यवदत् प्रभुः ॥ ५७ ॥

॥ श्रीयेषूरुवाच ॥

इस्रायेलोद्भवानेव पातुं भ्रान्तान् अवीन् अहं ॥
इदानीं प्रेषितोऽभूवं नान्यजानां तु हेतवे ॥ ५८ ॥

॥ गुरुरुवाच ॥

तया वाचा न रुद्धाऽसौ प्रणता प्रभु मार्थयत् ॥
स्वामिन् मे कुरु साहाय्य मिति येषू स्त्वभाषत ॥ ५९ ॥

॥ श्रीयेषूरुवाच ॥

तृप्यन्तु प्रथमं बाला स्तदीयं भोजनं यतः ॥
गृहीत्वा नोचितं चेत्तु कुक्कुरेभ्यः कदाचन ॥ ६० ॥

॥ गुरुरुवाच ॥

इमं निष्ठुरताभासं दयासिन्धो रपि प्रभोः ॥
निशम्यासौ ततोऽप्याशा मविहायेदमब्रवीत् ॥ ६१ ॥

॥ विदेशिन्युवाच ॥

सत्यं प्रभो तथाप्यन्नं यद् बालेभ्योऽवशिष्यते ॥
तत् पतत् स्वामिनः पात्रात् कुक्कुरा अपि भुञ्जते ॥ ६२ ॥

॥ गुरुरुवाच ॥

इत्थं श्रद्धायुतां तस्या नम्रता मवलोक्य सः ॥
प्रभु र्निर्दयताऽऽभासं त्यक्त्वा तामब्रवीत् पुनः ॥ ६३ ॥

॥ श्रीयेषूरुवाच ॥

महां स्ते ऽनेन वाक्येन विश्वासो नारि सिध्यति ॥
अत स्त्वं कुशलं याहि यथा चेष्टं तथाऽस्तु ते ॥ ६४ ॥

॥ गुरुरुवाच ॥

इमानि सान्त्ववाक्यानि निशम्यासौ विदेशिनी ॥
गृहं गत्वा सुतां स्वीयां प्राप भूतविवर्जितां ॥ ६५ ॥

ततोऽपि चाद्भुता येषू र्दर्शयामास सत्क्रियाः ॥
मृतान् मृत्युंजयो घोरात् कालग्रासात् समुद्धरन् ॥ ६६ ॥
स च्चैकदाऽन्वितःशिष्यै र्महता नृगणेन च ॥
पुरीं नैनाऽभिधां गच्छन् प्राप तद्गोपुरान्तिकं ॥ ६७ ॥
तत्राऽपश्यच्च नृस्कंधैरुह्यमानं वह्विर्मृतं ॥
योऽद्वितीयः सुतो मातु र्विधवाया अविद्यत ॥ ६८ ॥
तन्माता च स्वयं तत्र निर्यान्ती वाहकैः सह ॥
अनेकै स्तान्विता पौरै ररोदीत् शोकविप्लुता ॥ ६९ ॥
तां दृष्ट्वा सदयो येषू र्मारोत्सी रित्यसान्त्वयत् ॥
स्पृशंश्च कुणपाधारं स्थगयामास वाहकान् ॥ ७० ॥
मृतं चावोच दुत्तिष्ठ त्वां दिशामि युवन्निति ॥
सद्यश्चासौ युवोत्तस्थौ समारेभे च भाषितुं ॥ ७१ ॥
ततस्तं जीवदो येषू रर्पयामास मातरि ॥
द्रष्टार स्त्वखिला वेसु स्तुष्टुवुश्च परेश्वरं ॥ ७२ ॥
महाऽऽचार्य्योऽय मस्माकं मध्ये प्रादुरभूदिति ॥
निजे लोके दयादृष्टि मीश्वरश्चाऽकरोदिति ॥ ७३ ॥
अन्येद्यु र्यैरनामैको मठाध्यक्षः समागतः ॥
श्रीयेषूं प्रार्थयामास पतित्वा तस्य पादयोः ॥ ७४ ॥

॥ यैर उवाच ॥

बाला मे दुहितेदानीं मृतप्राया स्थिता प्रभो ॥
भवांस्तु चेत् स्पृशेदेत्य तस्या रक्षा तदा भवेत् ॥ ७५ ॥

॥ गुरुरुवाच ॥

इदं स्वीकृत्य तद्गेहं गन्तुं प्रातिष्ठत प्रभुः ॥
मार्गे तु तद्गृहात् कश्चि दुपस्थायेद मब्रवीत् ॥ ७६ ॥

॥ दूत उवाच ॥

भवतो दुहितुः प्राणाः संप्रत्येव विनिर्ययुः ॥
किमर्थम् आनयन् गेहं गुरुं क्लिश्नासि निष्फलम् ॥ ७७ ॥

॥ गुरुरुवाच ॥

एवं दूतोक्त माकर्ण्य येषू यैर मभाषत ॥
मा भैषीर्यदि विश्वस्या स्तदा जीवेत् सुता तव ॥ ७८ ॥
गेहं तु प्रविशन् येषूः प्राप्नोद्द वर्गं विलापिनाम् ॥
वादित्रवादकादीनां तुमुलध्वनिकारिणां ॥ ७९ ॥
तान् निषेधंश्च सोऽवादीद् हाहाकार इयान् कुतः ॥
कुमारी न प्रमीताऽस्ति किन्तु निद्राति वस्तुतः ॥ ८० ॥
इदं प्रभो वंचः श्रुत्वा ते तदर्थाविवेचिनः ॥
कन्यां च वस्तुतः प्रेतां जानन्त स्तमुपाहसन् ॥ ८१ ॥
अमून् सर्वांस्तु निष्कास्य कन्यापार्श्वमुपस्थितः ॥
धृत्वा च तत्करं येषू रुत्तिष्ठेति जगाद ताम् ॥ ८२ ॥
तदादेशप्रभावेन प्राणान् प्राप्तवती पुनः ॥
उत्तस्थौ तत्क्षणात् कन्या चलितुं च प्रचक्रमे ॥ ८३ ॥

अथाऽपरं प्रभोः कर्म प्रोक्तात् कर्मद्वयादपि ॥
अत्याश्चर्यतरं वक्ष्ये मृत्युशक्तिविनाशकं ॥ ८४ ॥
बेथनीयाभिधग्रामवासी येषूप्रियो जनः ॥
लाजारसंज्ञकः साधु रेकदाऽभवदातुरः ॥ ८५ ॥
निजस्य रोगिणो भ्रातु र्दुदशाज्ञापनाय तु ॥
स्वसारौ तस्य संदेश मनैौत्सातां प्रभुं प्रति ॥ ८६ ॥
इमं संदेश माकर्ण्य तेषु त्रिष्वपि वत्सलः ॥
येषू र्न तत्वरे गन्तुं व्याहरत्त्वेव मस्फुटं ॥ ८७ ॥

॥ श्रीयेषूरुवाच ॥

न लाजारस्य मत्यर्थं मामयोऽयमजायत ॥
ईश्वरस्येशसूनोश्च महिम्नो दर्शनाय तु ॥ ८८ ॥
इत्युक्त्वा तत्समाचारप्राप्तेः पश्चाद् दिनद्वयम् ॥
श्रीयेषू स्तत्स्थलेऽतिष्ठद् यत्र पूर्वं मवर्त्तत ॥ ८९ ॥
ततः शिष्यान् प्रभुः प्रोचे लाजारः स्वपिति प्रियः ॥
तं जागरयितुं चाह मितो गच्छामि सांप्रतं ॥ ९० ॥
शिष्यास्त्वोचुः स सुप्तश्चेत् तर्हि सुस्थो भवेदिति ॥
यतः सुषुप्तिविश्रामे तेऽबुध्यन्त प्रभोर्गिरम् ॥ ९१ ॥
परंतु वस्तुतो मृत्युं पूर्वं मुद्दिष्टवान् प्रभुः ॥
तात्पर्यं स्वस्य वाक्यस्य पुनरेव मबोधयत् ॥ ९२ ॥

॥ श्रीयेषूरुवाच ॥

मृतं जानीत लाजारं तन्मृत्यो र्वारणाय तु ॥
तदा तत्र स्थितो नासमिति हर्षास्पदं मम ॥ ९३ ॥

खस्याऽनुपस्थितत्वात्तु यस्तोषो मे प्रजायते ॥
स युष्मदर्थं मेवाऽस्ति युष्मद्विश्वासवृद्धये ॥ ९४ ॥

॥ गुरुरुवाच ॥

लाजारस्य श्मशानान्तः स्थापनात् परतो गते ॥
अहस्सुतुष्टये येषू बैंथनीयां समागमत् ॥ ९५ ॥
प्रभो स्तत्राऽऽगमं श्रुत्वा लाजारस्य सहोदरा ॥
निष्क्रान्ता सदनाद् येषूं साक्षात्कर्त्तुं गताऽवदत् ॥ ९६ ॥

॥ मार्थोवाच ॥

अहो प्रभो भवान् पूर्वं यद्यऽस्थास्यद् इह स्थले ॥
तदा स्वामिन् मम भ्राता नामरिष्यत् कदाचन ॥ ९७ ॥
इदानीं चापि यद्यत् त्वं परमेश्वरमर्थयेः ॥
तत्तत् ते प्रददीतासा विति जानामि निश्चितं ॥ ९८ ॥

॥ गुरुरुवाच ॥

एवं श्रद्धोक्ति माकर्ण्य ततः सान्त्वावहं वचः ॥
तव भ्राता समुत्थाता पुन रित्यब्रवीत् प्रभुः ॥ ९९ ॥
ततः प्रत्यब्रवीद् मार्था महोत्थानदिनेऽन्तिमे ॥
सोऽप्युत्थातेति वेद्मीति ततो येषू रवक् पुनः ॥ १०० ॥

॥ श्रीयेषूरुवाच ॥

अह मेवाकरो विद्धे पुनरुत्थानजीवयोः ॥
मयि प्रत्येति यः कश्चिदसौ मृत्वाऽपि जीविता ॥ १०१ ॥

मयि प्रत्येति यो जीवन् स न जातु मरिष्यति ॥
हे मार्थे किं मदीयेयं कथा विश्वस्यते त्वया ॥ १०२ ॥

॥ मार्थोवाच ॥

एवं, प्रादुर्भवो यस्य संसारेऽपेक्ष्यत प्रभो ॥
स एवेशात्मजः ख्रीष्ट स्त्वमसीति मतं मम ॥ १०३ ॥

॥ गुरुरुवाच ॥

ततो गृहं गता मार्था मरीयां भगिनीं निजां ॥
आहूय ज्ञापयामास सद्गुरु स्त्वां दिदृक्षते ॥ १०४ ॥
मरीया त्विदमाक्रानं श्रुत्वोत्थाय च तत्क्षणे ॥
अतिद्रुतं प्रभोः साक्षाद् गत्वेदं प्रणताऽब्रवीत् ॥ १०५ ॥

॥ मरीयोवाच ॥

अहो प्रभो भवान् पूर्वं यद्यऽस्थास्यदिह स्थले ॥
तदा स्वामिन् मम भ्राता नामरिष्यत् कदाचन ॥ १०६ ॥

॥ गुरुरुवाच ॥

तां तस्याः संगिन स्त्वान्यान् यहूद्यान् रुदतोऽखिलान् ॥
विलोक्य मन्युना येषूः समदुःखो न्यपीड्यत ॥ १०७ ॥
मृतं चोद्दिश्य पप्रच्छ तं काऽस्थापयत स्थले ॥
इत्यस्य चोत्तरं प्राप द्रष्टु मागम्यतां प्रभो ॥ १०८ ॥

श्रीयेषूस्तु तदाऽरोदीत् तत्तु दृष्ट्वा यहूदिनः ॥
मिथः प्रोचु रयं कीदृगमुष्मिन् प्रीतवानिति ॥ १०९ ॥
अन्ये बभाषिरे योऽयं दृष्टिं मन्धाय दत्तवान् ॥
स किं सम्यक् क्षमो नासीत् तस्य वारयितुं मृतिं ॥ ११० ॥
ततो यत्र शवस्तस्थौ गह्वरेऽश्माऽवरोधिते ॥
सुदीर्घं निश्वसन्नन्तः प्रभु स्तत्राऽऽगतोऽब्रवीत् ॥ १११ ॥
अश्माऽपसार्यतां द्वारात् तदा मार्थाऽवदत् प्रभो ॥
दुर्गन्धः सोऽधुना जातः स्थितोऽत्राहस्त्रतुष्टयं ॥ ११२ ॥
तदा येषू र्बभाषे तां चेद् विश्वस्या स्तदा विभोः ॥
माहात्म्यं त्वं समीक्षेथा इति किं नावदं पुरा ॥ ११३ ॥
पाषाणे गह्वरद्वारात् प्रभ्वाज्ञातोऽपसारिते ॥
येषूरूर्द्ध्वेक्षणो भूत्वा वाक्य मेतद न्यवेदयत् ॥ ११४ ॥

॥ श्रीयेषूरुवाच ॥

हे पित स्त्वा मह्हं स्तौमि वचनं मे यतोऽशृणोः ॥
सदा च मामिकां वाचं शृणोषीत्यपि वेद्म्यहं ॥ ११५ ॥
यथात्विह स्थिता लोका विश्वस्यु र्मामके पदे ॥
अहं त्वयेरितोऽस्मीति तस्मादित्थं न्यवेदयम् ॥ ११६ ॥

॥ गुरुरुवाच ॥

इत्युक्त्वा स्वां महाशक्तिं दर्शयन्नीश्वरात्मजः ॥
लाजार वहिरेहीति मृतं प्रोच्चैः समाह्वयत् ॥ ११७ ॥

सद्योऽसौ वह्निरागच्छद् वस्त्रै र्बद्धकरांघ्रिकः ॥
बद्धास्यो गात्रमार्जन्या यथा न्यस्यत गह्वरे ॥ ११८ ॥
अनिरुद्ध स्तदा येषू र्मृत्युपाशविभेदकः ॥
बन्धनानि विमोच्यैनं त्यजतेति समादिशत् ॥ ११९ ॥
इत्याद्याश्चर्यकर्माणि प्रत्यक्षाणि प्रदर्शयन् ॥
स्वस्याऽतिमानुषीं शक्तिं लोकेषु व्यांजयत् प्रभुः ॥ १२० ॥
लोकां स्वेद्ृत्त्वमाहात्म्यप्रकाशेन चमत्कृतान् ॥
स स्वोक्तेषूपदेशेषु मनो योक्तु मतेजयत् ॥ १२१ ॥
ततस्त्व नूलशास्त्रस्य प्रचारेऽयं नियोजितः ॥
इतीशेनार्पितं स्वस्मिन्नधिकारमसाधयत् ॥ १२२ ॥
प्रोक्तानां कर्मणां चान्यत् फल मेतत् प्रतीयते ॥
तत स्तत्कर्त्तुरुक्तीनां भावो व्यक्तत्वमाप्नुते ॥ १२३ ॥
रक्षार्थै नच नाशाय मर्त्याना मह्मागतः ॥
एवं स्वस्याऽऽगमस्यार्थं मुक्त येषूरवर्णयत् ॥ १२४ ॥
एतद्वाक्यानुसारेण धारा तत्कर्मणामपि ॥
शुभदा दुःखसंहर्त्री दीनोद्धर्त्री च दृश्यते ॥ १२५ ॥
सोऽनन्तैश्वर्ययुक्तोऽपि मार्द्दवेन सदाऽऽचरत् ॥
न चोग्रोत्पातयोगेन जातु दुष्टा ननाशयत् ॥ १२६ ।
तत्रैकं श्रूयतामेतद् वक्ष्यमाणं निदर्शनं ॥
यतः प्रभोर्महाशक्तेः परा क्षान्तिः प्रकाशते ॥ १२७ ॥
श्रीयेषू रेकदा यात्रां कुर्वन् सामार्यनीवृति ॥
स्वस्याग्रे कंचन ग्रामं दूतान् प्रस्तुतयेऽनुदत् ॥ १२८ ॥

प्रभौ तूपस्थिते तत्र जनास्तद्ग्रामवासिनः ॥
यद्भिन्नधर्माण स्तस्यातिथ्यं न चक्रिरे ॥ १२९ ॥
तद् दृष्ट्वाऽपृच्छतां शिष्यौ किमग्निं पतितुं दिवः ॥
अमूंश्च भस्मसात्कर्त्तुं मादेच्छयाव शठान् प्रभो ॥ १३० ॥
तद्वाक्येनाऽप्रसन्नस्तु श्रीयेषूस्तावतर्जयत् ॥
स्वशिष्यै स्वान्वितः सद्य स्ततो ग्रामान्तरं ययौ ॥ १३१ ॥
शरीरमात्रकल्याणसिद्धये त्वीश्वरात्मजः ॥
स्वर्गा दवातरद् भूमाविति जातु न मन्यताम् ॥ १३२ ॥
यस्त्वात्मा नृषु मुख्यांऽशो नियन्ता वपुषः प्रभुः ॥
तमेवं पाप्मना रुग्णं सुस्थीकर्त्तुं स आगमत् ॥ १३३ ॥
अतो यत् प्रभुणाऽकारि कायरोगचिकित्सनं ॥
आतुरस्याऽऽत्मन स्तेन सुस्थीकारो निदर्श्यते ॥ १३४ ॥
शुद्ध्या हि कुष्ठिनां शुद्धिरात्मनोऽप्युपमीयते ॥
अन्धेभ्यो दृष्टिदानेन धीदृष्टे स्वामलीकृतिः ॥ १३५ ॥
यां येषू रात्मन स्तृप्त्यै परमार्थसुधां ददौ ॥
तस्याश्छायेव विज्ञेया साऽन्नवृद्धि र्महाद्भुता ॥ १३६ ॥
मृतोत्थापनशक्त्या च शक्ति रन्या महत्तरा ॥
सद्धर्मप्राणहीनानां प्राणदात्री निदर्श्यते ॥ १३७ ॥

इति श्रीमहामोक्तृयेषूख्रष्टमाहात्म्येऽद्भुतक्रियावर्णनं नाम
तृतीयोऽध्यायः ॥

॥ शिष्य उवाच ॥

मनुष्यान् सत्पथे नेतुं चातुं चैवांहसो वशात् ॥
अवतीर्णो विभोः सूनुः कीदृक् कीदृगुपादिशत् ॥ १ ॥

॥ गुरुरुवाच ॥

श्रीयेषूः सर्वतो देशं यहूदीयं परिव्रजन् ॥
इभ्यान् निःस्वान् बुधान् अज्ञानिति सर्वानशिक्षयत् ॥ २ ॥
वाह्याचारेण सन्तुष्टा नन्तर्धर्मे त्वतत्परान् ॥
बहून् जनान् विलोक्यैवं हृन्मर्मज्ञोऽवदत् प्रभुः ॥ ३ ॥

॥ श्रीयेषूरुवाच ॥

मा हन्याः किंच यो हन्यात् स दण्डार्हो भवेदिति ॥
आदिष्टं शुश्रुव प्रलैराचार्यैः प्राक्तनान् प्रति ॥ ४ ॥
परंत्वहं ब्रुवे युष्मान् यो जनः कारणं विना ॥
निजाय क्रुध्यति भ्रात्रे दण्डयोग्यः स विद्यते ॥ ५ ॥
भ्रातरं यस्त्वरे ब्रूयात् स दण्डार्होऽस्ति संसदि ॥
यस्तु मूर्खेति तं निंदेत् नरकाग्न्युचितोऽस्ति सः ॥ ६ ॥
तस्मात् त्वं निजनैवेद्यं वेद्यासन्ने यदात्मनयेः ॥
तदा स्वेनापराद्धं चेत् त्वं स्मरे भ्रातरं प्रति ॥ ७ ॥
तर्हि तत्र बलिं त्यक्त्वा याहि तेन च सम्मिल ॥
तत्पश्चात् पुनरागत्य विभवे बलि मुत्सृज ॥ ८ ॥ युग्मं ॥

त्वं मा व्यभिचरेत्युक्तं प्राक् कालेऽहंतु वच्मि वः ॥
यः कामाद् योषितं पश्येत् सोऽप्यन्त व्यभिचारकः ॥ ९ ॥

॥ गुरुरुवाच ॥

लोकाग्रे धार्मिकान् भातु मिच्छतोऽन्तस्तु कच्चरान् ॥
जनान् दृष्ट्वा प्रभुः स्पुद्धि मान्तरीमेव मादिशत् ॥ १० ॥

॥ श्रीयेषूरुवाच ॥

सत्कर्म मा नृणां साच्चात् कुरुध्वं कीर्तिलब्धये ॥
नचेत् तदा न लप्स्यध्वे किंचित् स्वःस्थात् पितुः फलं ॥ ११ ॥
दानं तु त्वं यदा कुर्य्यास्तदा मा धर्मलिंगिवत् ॥
स्वस्याग्रे वादये स्तूरीं प्रतोलीषु सभासु च ॥ १२ ॥
तव प्रकुर्वतो दानं वामः पाणिर्न कर्हिचित् ॥
जानातु काऽपसव्येन पाणिना क्रियते क्रिया ॥ १३ ॥
तथा गुप्तं भवेद् दानं तावकस्य पिता ततः ॥
गुप्तदर्शी फलं तुभ्यं सप्रकाशं प्रदास्यति ॥ १४ ॥
मा धर्मलिंगिनां रीत्या प्रार्थये यैं सभान्तरे ॥
शृंगाटके च तिष्ठन्तः प्रार्थयन्ते सुकीर्त्तये ॥ १५ ॥
यदातु प्रार्थनां कुर्या स्तदाऽन्त र्भवने निजे ॥
प्रविश्य पितरं गुप्तं द्वारं रुध्वा त्वमर्थय ॥ १६ ॥
मा धर्मलिंगिनो यद्वदुपवासं तथाऽऽचर ॥
स्वोपोषणप्रकाशाय म्लाययन्ति मुखानि ते ॥ १७ ॥

त्वया त्वभ्यक्तशीर्षेण धौतास्येनोपवस्यताम् ॥
यथा लोकै र्न दृश्येथाः साक्षादुपवसन्निव ॥ १८ ॥
तदा स्वर्गस्थित स्तातो यो गुप्तान्यपि पश्यति ॥
स सुक्रियाफलं तुभ्यं सप्रकाशं प्रदास्यति ॥ १९ ॥

॥ गुरुरुवाच ॥

स्वपुण्यत्वाऽभिमानेन परेषा मवमानिनः ॥
कांश्चिज्जनान् प्रभु र्दृष्ट्वा दृष्टान्तेनैव माक्षिपत् ॥ २० ॥

॥ श्रीयेषूरुवाच ॥

प्रार्थनार्थे मनुष्यौ द्वौ ययतु र्विभुमन्दिरे ॥
फरीष्यसंप्रदाय्येकः करग्राही तथाऽपरः ॥ २१ ॥
तत्र दण्डायमानोऽसौ फरीष्याख्यमतानुगः ॥
एतादृशेन रूपेण प्रार्थयत् परमेश्वरं ॥ २२ ॥
यादृशोऽन्ये नरा दुष्टा यादृग् वैष करग्रहः ॥
तादृग् नास्मीति हेतो स्त्वां धन्यं वच्मि परेश्वर ॥ २३ ॥
सप्ताहेऽह्नोद्वयं नित्य मुपवासं करोम्यहं ॥
ईशाय सर्वसंपत्ते र्दशमांशं ददामि च ॥ २४ ॥
इत्युक्तं गर्विणा तेन नम्रात्मा तु करग्रहः ॥
दूरस्थः साहसं नाप्नोत् स्वर्गं मूर्द्धं निरीक्षितुं ॥ २५ ॥
अथ स्त्वालोचमानोऽसौ करं हत्वा स्ववक्षसि ॥
प्रभो दयस्व पापिष्ठमीश मामित्यमब्रवीत् ॥ २६ ॥

दीनात्माऽयं जनोऽमुष्मात् पूर्वोक्तादितराद् नरात् ॥
मुद्दोक्ततोऽधिकं गेहं जगामेति ब्रवीमि वः ॥ २७ ॥
यतो यः कश्चिदात्मान मुन्नेष्यति स नंस्यते ॥
आत्मानं यस्तु नमये दसा वुन्नतिमाप्नुयात् ॥ २८ ॥

॥ गुरुरुवाच ॥

निर्वेदो दीनसेवा च कार्या श्रेष्ठपदैरपि ॥
इत्येतद् भृत्यवद् भूत्वा दृष्टान्तेनाज्ञयत् प्रभुः ॥ २९ ॥
एकदा स्वतनुत्यागे सन्निकर्ष मुपस्थिते ॥
स्वं कटिं गात्रमार्जन्या बबंध जगतां पतिः ॥ ३० ॥
ततः पात्रेऽभिषिच्याम्भः स्वशिष्याणां पदो गुरुः ॥
प्रक्षालय मार्ष्टु मारेभे गात्रमार्जनवाससा ॥ ३१ ॥
तत्सेवकोचितं कर्म सर्वसेव्यः समाप्तवान् ॥
श्रोयेषूः पुनरासीनः स्वानुगानेव मादिशत् ॥ ३२ ॥
किमेतत् कर्म बुध्यध्वे यन्मया सांप्रतं कृतं ॥
गुरुं प्रभुं च मां स्थाने ख्याथ सोऽहं भवामि हि ॥ ३३ ॥
यदि वोऽक्षालयं पादान् गुरुः स्वामी च सन्नहं ॥
तदाऽन्योन्यं पदो यूयं प्रक्षालयितु मर्हथ ॥ ३४ ॥
दृष्टान्तोऽयं हि युष्मभ्यं मयाऽदायि यथा सदा ॥
युष्मान् प्रत्याचरं यादृग् यूयं कुर्यात तादृशं ॥ ३५ ॥
न श्रेयान् किंकरो नाथाद् न दूतः प्रेरकाद् महान् ॥
विज्ञायैतानि कुर्यात चेत् तदा स्यात मंगलाः ॥ ३६ ॥

योभोजने समासीनः स न किं सेवकाद् महान् ॥
नाथोऽप्यऽहं तु वो मध्ये आचरामि भुजिष्यवत् ॥ ३७ ॥

॥ गुरुरुवाच ॥

अन्येद्युः श्रीप्रभोः शिष्या व्यवदन्त परस्परं ॥
तन्मध्ये पदवो श्रेष्ठा कतमस्य भवेदिति ॥ ३८ ॥
तद्विवादं तु विज्ञाय शिशु माहूय कंचन ॥
तेषां मध्ये च संस्थाप्य प्रभुस्ता नब्रवीदिदम् ॥ ३९ ॥

॥ श्रीयेषूरुवाच ॥

परावृत्तहृदो बालै स्तुल्यास्त्व न भवेत चेत् ॥
तदा स्वर्गीयराज्यान्तः प्रवेष्टुं न शक्ष्यिथ ॥ ४० ॥
अतो यः कोऽपि नम्रात्मा यथा बाल स्तथा भवेत् ॥
स एव स्वर्गसाम्राज्ये निखिलानां महत्तमः ॥ ४१ ॥

॥ गुरुरुवाच ॥

मुहुरप्यपकर्तॄणां क्षमा कार्याऽपराधिनाम् ॥
नचाहितप्रतीकार इत्येवं प्रभु रादिशत् ॥ ४२ ॥

॥ श्रीयेषूरुवाच ॥

परेषा मपराधान् हि क्षमेध्वं यदि सर्वदा ॥
युष्मदीयानपि स्वर्ग्यः पिता तर्हि क्षमिष्यते ॥ ४३ ॥

अपराधक्षमा त्वीदृग् युष्माभि र्न क्रियेत चेत् ॥
तदा स्वःस्थेन पित्राऽपि युष्माकं न करिष्यते ॥ ४४ ॥

॥ गुरुरुवाच ॥

तथाऽनुयायिनामेकः पत्राऽभिख्योऽन्यदा प्रभुं ॥
क्षमाया विषये पृष्ट्वा लेभे तादृश मुत्तरम् ॥ ४५ ॥

॥ पत्रनामा शिष्य उवाच ॥

परस्मिन् पुरुषे मह्यं कतिकृत्वोऽपराध्यति ॥
तद्दोषं क्षन्तु मर्हामि सप्तकृत्वः किमर्हति ॥ ४६ ॥

॥ श्रीयिषूरुवाच ॥

अहं त्वामादिशाम्येतत् सप्तकृत्वो न केवलं ॥
परंतु सप्ततिगुणसप्तकृत्वः क्षमां कुरु ॥ ४७ ॥
स्वार्थाव्ययव्यययोः संख्यां दासैः सार्द्धं चिकीर्षतः ॥
दृष्टान्तः कस्यचिद् राज्ञो मनो युक्त्वा निशम्यताम् ॥ ४८ ॥
गणने स्वामिनाऽऽरब्धे कश्चिदानायि किंकरः ॥
मुद्राणां योऽयुतं स्वस्मै नाथायर्णमधारयत् ॥ ४९ ॥
परिशोधाक्षमे तस्मिन् प्रभु स्तस्यर्णशुद्धये ॥
सस्त्रीसन्तानवित्तस्य तस्य विक्रय मादिशत् ॥ ५० ॥
तदाऽसा वब्रवीद् भृत्यः प्रभोस्तच्चरणयोः पतन् ॥
भो धैर्य्यं धारयेः स्वामिन् परिशोत्स्यामि तेऽखिलं ॥ ५१ ॥

अतो दयार्द्रहृद् भूत्वा स उदारो महीपतिः ॥
तं निःस्व मत्यजद् दासं सर्वं चर्णममोचयत् ॥ ५२ ॥
अयं भृत्यस्तु निष्क्रम्य सभृत्यं प्राप कंचन ॥
सभृत्योऽसौ च तस्याऽऽसीद् मुद्रापादशतर्णिकः ॥ ५३ ॥
अमुं धृत्वा स तत्कण्ठं संपीड्योवाच निर्दयः ॥
ऋणं यावद् मया प्राप्यं तावद् मे परिशोधय ॥ ५४ ॥
पतं स्तत्पादयोर्नम्रः सभृत्योऽसौ न्यवेदयत् ॥
धैर्य्यं चेद् धारये स्तर्हि शोधयिष्यामि तेऽखिलं ॥ ५५ ॥
इदं न स्वीचकाराऽयं किंतु यावत् स सर्वशः ॥
ऋणं न शोधयेत् तावत् कारायां तमबन्धयत् ॥ ५६ ॥
तद्वृत्तं सकलं दृष्ट्वा भृत्या अन्ये सुदुःखिताः ॥
आगत्य तस्य वृत्तान्तं स्वामिनेऽतो न्यवेदयन् ॥ ५७ ॥
अथ स्वामी तमाहूय प्रोचे रे भृत्य दुष्टहृत् ॥
त्वयाऽहं प्रार्थितः स्वीय मृणं कृत्स्न ममोचयम् ॥ ५८ ॥
अत स्त्वं यादृशीं प्राप्तोः करुणां मम सन्निधौ ॥
किं नार्हं स्तादृशीं कर्त्तुं सहदासं निजं प्रति ॥ ५९ ॥
इत्युक्त्वा तत्प्रभुः क्रुध्यन् ऋणं यावद् न शोधयेत् ॥
तावत् तमर्पयामास कारागारस्य रक्षिषु ॥ ६० ॥
तथा युष्मान् प्रति स्वःस्थो मम तातः करिष्यति ॥
परेषा मपराधांश्चेद् न क्षमेध्वं हृदा समे ॥ ६१ ॥

॥ गुरुरुवाच ॥

नरैस्त्वान्ुग्रहः कार्यः स्वविरोधिजनेष्वपि ॥
विद्वेषखण्डनैर्वाक्यैः प्रभुरेभि रुपादिशत् ॥ ६२ ॥

॥ श्रीयेषूरुवाच ॥

बन्धौ स्निह्येर्द्विषे द्रुह्येश्चेति शुश्रुव भाषितम् ॥
परंत्वहं ब्रुवे युष्मान् प्रीणयध्व मरिष्वपि ॥ ६३ ॥
शपह्योऽप्याशिषं दत्त द्रुह्यद्भ्यस्त्वाऽप्यनुग्रहं ॥
ये वोऽसूयन्ति बाधन्ते चार्थयेताऽपि तत्कृते ॥ ६४ ॥
तदा स्वर्ग्यपितुः स्यात सदृशाः सत्स्वऽसत्सु च ॥
स्वमुदाययतः सूर्य मुभयेषु च वर्षतः ॥ ६५ ॥

॥ गुरुरुवाच ॥

वयं पुण्याऽन्वयोत्पन्नाः पुन्यशास्त्राऽधिकारिणः ॥
इत्थं मानाद् विजातीयां स्तिरस्त्रक्रुर्यह्रदिनः ॥ ६६ ॥
एनं दुराग्रहं तेषां परिहर्त्तुं लषन् प्रभुः ॥
साधारणोपकर्तृत्वधर्ममेवमसूचयत् ॥ ६७ ॥

॥ श्रीयेषूरुवाच ॥

पान्थः कश्चिद् यह्रदीयो यिरूखोनगरं प्रति ॥
यिरूषलीम्पुराद् गच्छन् दस्युवर्गकरेऽपतत् ॥ ६८ ॥

तत्र नग्नीकृतोऽसौ तैराहत श्चापि निर्दयैः ॥
अत्यज्यत मृतप्रायो निरुपायश्च भूतले ॥ ६९ ॥
अकस्माद् याजकः कश्चित् पथि गच्छंस्तमैक्षत ॥
ययौ त्वध्वाऽन्यपार्श्वेन नच किंचिदुपाकरोत् ॥ ७० ॥
तद्वल्लेवीयवंशीय स्तत्र कश्चिदुपस्थितः ॥
दृष्ट्वा चान्येन पार्श्वेन जगामाऽनुपकृत्य तं ॥ ७१ ॥
कश्चित् सामार्यवंश्यस्तु विजातीयश्चलन् पथि ॥
विलोक्य दुर्दशां तस्य दयार्द्रहृदयोऽभवत् ॥ ७२ ॥
तत स्तदन्तिकं गत्वा तत्क्षतानि बबन्ध सः ॥
स्ववाहने तमारोप्य पान्थशालां निनाय च ॥ ७३ ॥
परेद्युः प्रस्थितेः काले मुद्राद्वं स्वसकाशतः ॥
निष्कास्य पान्थशालायाः स्वामिने ददद्ब्रवीत् ॥ ७४ ॥
सेवस्व त्वमिमं दीनं व्ययो यश्चाऽधिको भवेत् ॥
तावन्तं शोधयिष्यामि पुनरागतवानिति ॥ ७५ ॥
त्वन्मते कतमोऽमीषां त्रयाणां पथिचारिणां ॥
चोराक्रान्ते जने तस्मिन् त्वसजातीयवदाचरत् ॥ ७६ ॥

॥ गुरुरुवाच ॥

स यं प्रभु स्तदाऽपृच्छत् प्रश्नं श्रुत्वा प्रभोरिमं ॥
तस्येदमुत्तरं प्रोचे यो दयामकरोदिति ॥ ७७ ॥
इदं प्रत्युत्तरं तस्य निशम्य प्रभुरादिशत् ॥
तत्सुक्रियाऽनुसारेण त्वयाऽप्याचर्यतामिति ॥ ७८ ॥

पश्यंस्त्र कायया च्छायाश्चिन्तया व्याकुलान् जनान्॥
विश्वासमीश्वरे कर्त्तुं येषूरेवमशिक्षयत्॥ ७९॥

॥ श्रीयेषूरुवाच॥

अहं वो वच्मि जीवार्थं चिन्तां मा कुरुताऽऽकुलाः॥
किं खाद्यं किंच पातव्यं परिधेयं च किं तनौ॥ ८०॥
युष्माकं जीवनं किं न भोजनादतिरिच्यते॥
तथा तनुस्त्र वस्त्रेभ्यः श्रेयसी किं न विद्यते॥ ८१॥
विहंगमा विलोक्यन्तां नहि वीजं वपन्ति ते॥
नवा छिन्दन्ति ते शस्यं संचिन्वन्ति खलेषु वा॥ ८२॥
तथापि वः पिता स्वःस्थ स्तेभ्यो यच्छति भोजनम्॥
किं यूयं नातिरिच्यध्वे तस्मात् पक्षिगणाद् भृशम्॥ ८३॥
युष्मासु चेदृशः कोऽस्ति जनो यो बहु चिन्तयन्॥
शक्नुयादायुषि स्वस्मिन्नेकं वर्द्धयितुं क्षणं॥ ८४॥
तादृक् साधयितुं कार्यं लघिष्ठं यूय मक्षमाः॥
किमर्थं व्याकुला श्चिन्तां कुरुथाऽन्येषु वस्तुषु॥ ८५॥
पद्मानि पश्यतैतानि न श्राम्यन्ति वपन्ति वा॥
तद्वत्तु भूषितो नासीत् सुलेमाऽपि प्रतापवान्॥ ८६॥
यदद्य विद्यते श्वस्तु चुल्ल्यां प्रक्षिप्यते तृणं॥
तदित्थं भूषयित्वेशः किं न वस्त्रं ददीत वः॥ ८७॥
तस्मात् पेयान्नवस्त्रार्थं मा स्त व्याकुलमानसाः॥
तत्र प्रयोजनं वोऽस्ति ह्नीति वेत्ति परेश्वरः॥ ८८॥

॥ गुरुरुवाच ॥

रक्षायामस्मदीयायां चिन्ता चेशस्य कीदृशी ॥
इत्येवं व्यञ्जयामास दृष्टान्तेनेश्वरात्मजः ॥ ८९ ॥

॥ श्रीयेषूरुवाच ॥

पणेन न किमेकेन क्रीयते चटकद्वयं ॥
विना वः पितुराज्ञांतु तदेको न पतेद् भुवि ॥ ९० ॥
एवं वः शिरसां सर्वे गणिताः सन्ति कुन्तलाः ॥
अतो माभैष्ट यूयं हि महार्घा श्चटकव्रजात् ॥ ९१

॥ गुरुरुवाच ॥

नृणां पापात् परावृत्ति मीशः कीदृक् समीहते ॥
इत्येवं पञ्चयामास दृष्टान्तैः सद्गुरु स्त्रिभिः ॥ ९२ ॥

॥ श्रीयेषूरुवाच ॥

तिष्ठत्सु शतमेषेषु तदेकं हारयेद् यदि ॥
युष्माकं कस्तमन्वेच्छयन् नेयाच्छेषां स्त्यजन् वने ॥ ९३ ॥
तं च प्राप्य मुदा स्कन्धे चारोप्यागत्य बान्धवान् ॥
आहूय चाह मोदध्वं मया प्राप्तोऽविना सह ॥ ९४ ॥
तद्वत् पापात् परावृत्तिर्भ्रान्तस्यैकस्य पापिनः ॥
अभ्रान्तानां सतां धर्मात् स्वर्लोकेऽधिकहर्षदा ॥ ९५ ॥

॥ अपिच ॥

का स्त्री वा दशमुद्राढ्या तदेकां यदि हारयेत् ॥
दीपं प्रज्वाल्य गेहं च संमार्ज्य न गवेषयेत् ॥ ९६ ॥
आशु त्वाहूय सा वक्ति सखीः सप्रतिवासिनीः ॥
आनन्दत मया सार्द्धं गतां मुद्रां ह्यवाप्नवम् ॥ ९७ ॥
तथैकस्य परावृत्तिः पापिन स्तप्तचेतसः ॥
हर्षहा स्वर्गदूतानां भवतीति ब्रवीमि वः ॥ ९८ ॥

॥ अपरंच ॥

कस्यचिद् द्वौ सुता वास्तां कनिष्ठस्तु तमब्रवीत् ॥
त्वत्संपत्ते र्मया योंऽशः प्राप्य स्तं देहि मे पितः ॥ ९९ ॥
पित्रा विभज्य दत्ते तु संपत्त्यंशेऽचिराद् गतः ॥
विदेशे व्यसनेनार्थं युवा सर्वमनाशयत् ॥ १०० ॥
दुर्भिक्षे तत्र देशे तु संजाते दुर्दशावशात् ॥
तद्देशवासिनं कंचित् स गृहस्थ मसेवत ॥ १०१ ॥
कोलान् पालयितुं तेन नुन्न स्त्वान्यत् स भोजनम् ॥
अप्राप्य कोलखाद्येन तुन्दपूर्तिं समैहत ॥ १०२ ॥
शेषेच चेतनां प्राप्य सोऽवादीद् मत्पितुः कति ॥
भृत्या भक्ष्येण तृप्यन्ति किंत्वहं क्षुधया म्रिये ॥ १०३ ॥
उत्थाय स्वपितुः पार्श्वं गत्वा वक्ष्यामि हे पितः ॥
ईश्वरं प्रत्यपाराध्य महं साक्षाच्च ते भृशम् ॥ १०४ ॥

तव पुत्र इति ख्यातिं धर्त्तुं नार्हो ऽस्मि सांप्रतम् ॥
अतो वैतनिकेष्वेक मिव मां गणयेः पितः ॥ १०५ ॥
इत्युक्त्वा ऽसौ पितुः पार्श्वं ययौ मार्गेतु तं पिता ॥
दूरे ऽप्यायान्त मालोक्य दयांचक्रे स्वमात्मजं ॥ १०६ ॥
धावित्वा तं गले धृत्वा चालिलिंग चुचुंब च ॥
पुत्र स्त्वेवं विनीतात्मा बभाषे पितरं निजं ॥ १०७ ॥
ईश्वरं प्रत्यपाराध्यमहं साक्षाच्च ते पितः ॥
तव पुत्र इति ख्यातिं धर्तुं नार्हो ऽस्मि सांप्रतं ॥ १०८ ॥
पिता त्ववग् वरेणायं वाससा परिधाप्यतां ॥
ऊर्मिका चार्प्यतां हस्ते पादुके चास्य पादयोः ॥ १०९ ॥
पुष्टंच वत्समानीय तं प्रतोत्सवसग्धये ॥
मृतो ऽयमन्वजीवद्धि हारित स्त्वाप्यलभ्यत ॥ ११० ॥
आरब्धे तूत्सवे ज्येष्ठः पुत्रः क्षेत्रा दुपस्थितः ॥
वाद्यादिशब्द माकर्ण्य तस्य पप्रच्छ कारणं ॥ १२१ ॥
पृष्टः प्रत्यवदद् दासो भ्राता ते पुन रागमत् ॥
तं सुस्थं प्राप्य तातस्तु पुष्टं वत्सं मुदा ऽबधीत् ॥ ११२ ॥
ततः प्रकुप्य स ज्येष्ठः प्रवेष्टुं नैच्छ दोकसि ॥
अतस्तं वहिरागत्य प्रवेष्टुं प्रार्थयत् पिता ॥ ११३ ॥
सतु प्रत्यब्रवीत् तात मियतोऽब्दा नहं तव ॥
करोमि सन्ततं सेवां न जात्वाज्ञां विलंघ्य ते ॥ ११४ ॥
तथापि सखिभिः सार्द्धं स्वकीयैः कर्त्तु मुत्सवम् ॥
मह्यमक मपि च्छागं नाददास्त्वं कदाचन ॥ ११५ ॥

यद्दातु तव पुत्रोऽयं वेश्यासंगेन ते धनं ॥
वितीर्य्यायाति तस्यार्थं वत्सं हंसि सुपोषितं ॥ ११६ ॥
पिता तूचे सदा पुत्र त्वं मया सह तिष्ठसि ॥
यद्यच्च मामकं द्रव्यं सर्वं तावक मस्ति तत् ॥ ११७ ॥
किंत्वद्यास्माकमानन्द उत्सव श्चाप्ययुज्यत ॥
भ्राता मृतोऽभवजीवद्धि हारित श्चाप्यवाप्यत ॥ ११८ ॥

॥ गुरुरुवाच ॥

सर्वेषां प्रार्थनां श्रोतुं वरान् दातुं च याचितान् ॥
कीदृगिच्छा विभोरेवं दृष्टान्तेनादिशत् प्रभुः ॥ ११९ ॥

॥ श्रीयेषूरुवाच ॥

याचध्वं तर्हि लप्स्यध्वे मृगयध्वं तदाऽऽप्स्यथ ॥
यत्नेन चाहत द्वारं ततश्चोद्घाटयिष्यते ॥ १२० ॥
यो याचते स आप्नोति योऽन्विच्छति स विंदति ॥
यो यस्य द्वार माहन्ति तत्तदर्थाय मोचयते ॥ १२१ ॥
पुत्राय कः पिता यच्छेत् पाषाणं पिष्टकार्थिने ॥
को वा भुजंगमं दद्यात् तस्मै मीन मभीप्सवे ॥ १२२ ॥
अतोऽसन्तोऽपि यूयं चेत् सुतेभ्यः सन्ति यच्छथ ॥
किं पुन र्वः पिता स्वर्ग्यः सद्वस्तूनि न दास्यति ॥ १२३ ॥

॥ गुरुरुवाच ॥

परंत्वेकाग्रचित्तेन यत्नतश्च मुहुर्मुहुः ॥
इष्टार्थप्रार्थनं कार्य्य मिति व्यक्तं व्यधात् प्रभुः ॥ १२४ ॥

तद्देशवासिन स्त्वन्ये लोकाः सामार्य्यनामकाः ॥
पाषंडाः स्थापयामासुः स्वदेशे मन्दिरं नवम् ॥ १४२ ॥
तेषां पाषण्डिनां देश मेकदा प्रभुरागतः ॥
तद्देशिन्था सद्दालापं कयाचिद् योषिताऽकरोत् ॥ १४३ ॥
सा प्रभो रुक्तिभि र्ज्ञानं तस्मिन् दृष्ट्वाऽद्भुतं स्थितम् ॥
मतयोर्भेदमुद्दिश्य स्वां शंका मेव मब्रवीत् ॥ १४४ ॥

॥ सामार्या योषिदुवाच ॥

अत्राद्रौ पितरोऽस्माक मभजन् परमेश्वरम् ॥
यूयं तु स्वे पुरे योग्यं स्थितं ब्रूथार्चनालयम् ॥ १४५ ॥

॥ गुरुरुवाच ॥

ईशायाऽर्चा कृता भक्तैर्यत्र कुत्रापि रोचत ॥
इत्येतत्सूचिकां वाचं येषू स्ता मब्रवीत् ततः ॥ १४६ ॥

॥ श्रीयेषूरुवाच ॥

आयात्येतादृशः कालो यदा नास्मिन् शिलोच्चये ॥
नवा यिरूशलेम् पुर्यां मीश्वरं पूजयिष्यथ ॥ १४७ ॥
आयात्येतादृशः कालो यदा सत्याः समर्चकाः ॥
पितरं पूजयिष्यन्ति सत्यत्वेनात्मनाऽपि च ॥ १४८ ॥
पिता हि तादृशेष्वेव पूजकेषु प्रीसदति ॥
आत्मनैव हि भक्तव्यः स्वय मात्मा परेश्वरः ॥ १४९ ॥

॥ गुरुरुवाच ॥

आदौ नृजाति रीशेन स्वमूर्त्तेरनुरूपिका ॥
पवित्रा ससृजे सम्यगैशज्ञानाऽधिकारिणी ॥ १५० ॥
अतः पवित्र मीशस्य स्वभावं परिचित्य सा ॥
तस्य ध्याने प्रसीदन्ती तत्सेवाया मसज्जत ॥ १५१ ॥
नृजातेः पितरौ त्वादेर्दशातोऽपन्नतां यदा ॥
तत्कालादैश्वरी मूर्त्ति राद्या पर्यणमत् तयोः ॥ १५२ ॥
तत स्तदन्वयः सत्यं हारयन ज्ञान मैश्वरम् ॥
नाना कल्पयितुं देवान् सेवितुं च प्रचक्रमे ॥ १५३ ॥
ये चैशेनोपदेशेन सत्यं ज्ञान मधारयन् ॥
तेऽपीशं व्यस्मरन् प्रायो विषयेषु रता दृढम् ॥ १५४ ॥
अतो निर्वापितः प्राय ईशप्रेमानलोऽमलः ॥
हृदयेषु मनुष्याणां प्रज्वाल्येत पुनः कथम् ॥ १५५ ॥
कथं चात्मा लघिष्ठेषु विषयेषु रतोऽधुना ॥
श्रेष्ठस्य परमार्थस्य पुन र्योज्येत चिन्तने ॥ १५६ ॥
इत्येतस्याऽनुयोगस्य प्रतिवाक्यं मनीषिणः ॥
अन्वैच्छन् सर्वदेशीया नच तत्त्व मवाप्नुवन् ॥ १५७ ॥
अमीतु यद् वृथाऽन्वैछन् आत्मनः सिद्धिसाधनम् ॥
तत् प्रत्यपादयद् येषूः पुनर्जन्मस्वरूपकं ॥ १५८ ॥
कश्चिच्छ्रेष्ठो यहूदानां नीकदेमाऽभिधो बुधः ॥
श्रीयेष्वः प्रान्तमागत्य निशाया मिद मब्रवीत् ॥ १५९ ॥

अतो नभस्वतो यादृगप्रत्यच्चो गमागमः ॥
तादृगेवात्मनः शक्त्या जनितानां पुनर्जनिः ॥ १६७ ॥

॥ गुरुरुवाच ॥

पुनर्जन्मादयो ये तु सद्वराः पारमार्थिकाः ॥
तान् सर्वान् स्वात्मजद्वारा नृभ्यो दत्ते परेश्वरः ॥ १६८ ॥
स एवेशात्मजः पित्रा नरचाता नियोजितः ॥
तस्मिंश्च प्रत्ययात् चाणमित्येवं सोऽदिशत् स्वयं ॥ १६९ ॥

॥ श्रीयेषूरुवाच ॥

इत्थं जगत्स्थितान् लोकान् दयांचक्रे परेश्वरः ॥
यत् तेषां हेतवे सूनुमद्वितीयं स्वमत्यजत् ॥ १७० ॥
ततो यः कोऽपि तं सूनुं विश्वासेन समाश्रयेत् ॥
स नाशं नव्रजेत् किन्तु प्राप्नुयाद् नित्यजीवनम् ॥ १७१ ॥
जगत्स्थानां हि लोकानां दण्डनाय परेश्वरः ॥
पुत्रं न प्रेरयामास निजं तद्रक्षनाय तु ॥ १७२ ॥
तस्मिन् यः कोऽपि विश्वासं कुरुते स न दण्ड्यते ॥
तचाविश्वासिनां दण्डो निर्णीतोऽस्त्यधुनैव तु ॥ १७३ ॥
दण्ड्यत्वकारणं चैतज् जगत्यां ज्योतिरागतं ॥
ज्योतिष स्त्वधिकं स्वान्ते प्रीयन्ते दुष्क्रिया नराः ॥ १७४ ॥
यतो दुष्कारिणः सर्वे द्रुह्यन्ति ज्योतिषे सदा ॥
न च तन्निकटं यान्ति स्वकर्माऽविष्कृतेर्भयात् ॥ १७५ ॥

॥ श्रीयेशूरुवाच ॥

जीवान्नमहमेवाऽस्मि स्वर्गादागत मैश्वरम् ॥
एतद् यः कोपि भुञ्जीत स जीवेत् शाश्वतीः समाः ॥ १९० ॥
यो मां समाश्रयेद् मर्त्यः स न क्षुध्येत् कदाचन ॥
यः कश्चिद् मयि विश्वस्यात् न पिपासेत् स कर्हिचित् ॥ १९१ ॥

॥ अपिच ॥

जगतो दीप्तिरूपोऽहं यस्त्व मा पुरुषोऽन्वियात् ॥
तिमिरे न भ्रमित्वा स प्राप्नुयाद् जीवनद्युतिम् ॥ १९२ ॥

॥ अपिच ॥

अहं मार्गस्त्व सत्यं च जीवनं चास्मि संस्थितः ॥
पितरं कोऽपि नोपैति मद्द्वारेण विना नरः ॥ १९३ ॥

॥ अपिच ॥

मयि तिष्ठत तेनाह मपि तिष्ठानि वोऽन्तरे ॥
अहं द्राक्षालतारूपो यूयं शाखास्वरूपिणः ॥ १९४ ॥
शाखा यथा द्रुमा च्छिन्ना फलं दातुं न शक्यति ॥
यूयं तथैव मच्छिन्नाः फलं दातुं न शक्नुथ ॥ १९५ ॥

॥ अपिच ॥

अविभ्यो जीवनं दातु मागतोऽहं सुपालकः ॥
सुपालकस्तु मेषार्थं निजप्राणान् विवर्जति ॥ १९६ ॥

॥ गुरुरुवाच ॥

पुनर्मनुष्यदेहस्य धारणेन नरात्मजः ॥
इत्याख्यः स्वागमस्यार्थं प्रभुरेव प्रबोधयत् ॥ १९७ ॥

॥ श्रीयेषूरुवाच ॥

नृपुत्रः सेवनं लब्धुं नाययौ किन्तु सेवितुम् ॥
अनेकेषां च निष्कृत्यै विस्रष्टुं निजजीवनम् ॥ १९८ ॥

॥ गुरुरुवाच ॥

प्रबोधनाय शिष्याणां धर्ममर्मविवेचने ॥
पवित्रस्यात्मनो दानमेवं प्रत्यशृणोत् प्रभुः ॥ १९९ ॥

॥ श्रीयेषूरुवाच ॥

पिता मयार्थितो वोऽन्यम् आदेष्टारं निरन्तरं ॥
स्थास्यन्तं युष्मदभ्यर्णे सत्यात्मानं प्रदास्यति ॥ २०० ॥
संसारोऽदृष्टमज्ञातं तं ग्रहीतुं न शक्नुयात् ॥
यूयं तु तं विजानीध्वे स हि युष्मासु तिष्ठति ॥ २०१ ॥
सचादेष्टा पवित्रात्मा मम पित्रा समीरितः ॥
मद्गुक्तीः स्मारयन् युष्मान् समस्तान्युपदेक्ष्यति ॥ २०२ ॥

॥ गुरुरुवाच ॥

स्वस्याज्ञाग्राहिणां पुंसां कीदृक् सिद्धिः प्रजायते ॥
इत्येवं बोधयामास कंचिद् भक्तगणं प्रति ॥२०३ ॥

आमयेन मयि ग्रस्ते यूयं मे चक्र सेवनम्॥
निबद्धे मयि कारायां यूयमाजग्म मेऽन्तिकं॥ २१९ ॥
इत्युक्ता धार्मिका ब्रूयुः प्रभो त्वां क्षुधितं कदा॥
कदा वा तृषितं दृष्ट्वा भक्ष्यपेये अदद्म ते॥ २२० ॥
कदा विदेशगं दृष्ट्वा त्वां स्ववेश्माऽऽनयाम च॥
निर्वस्त्रो वा कदाऽस्माभि र्दृष्ट स्त्वं परिधापितः॥ २२१ ॥
कदा त्वां रोगिणं दृष्ट्वा किंवा कारालये स्थितं॥
वयं त्वदुपकारार्थं समागच्छाम तेऽन्तिकं॥ २२२ ॥
तदा राजा वदेद् एषां भ्रातॄणां मम कानपि॥
लघिष्ठान् प्रति यच्चक्र यूयं मा प्रति चक्र तत्॥ २२३ ॥
ततो ब्रूयात् स वामस्थान् रे शप्ता योऽनलोऽक्षयः॥
शैतानस्य सदूतस्य कृतेऽसर्जि प्रयात तं॥ २२४ ॥
यतो भक्ष्यं क्षुधार्त्ताय मह्यं पेयं च तृष्णजे॥
नादत्त मा विदेशस्थं नच निन्य स्वमन्दिरम्॥ २२५ ॥
युष्माभि र्वस्त्रहीनोऽहं वस्त्रै र्नो परिधापितः॥
रोगी कारास्थितश्चाहं युष्माभि र्नोपसेवितः॥ २२६ ॥
तेच ब्रूयुः कदा स्वामिन् क्षुधितस्तृषितो भवान्॥
नग्नो रुग्णो विदेशस्थो बद्धोऽस्माभि र्न सेवितः॥ २२७ ॥
ततो राजा वदेद् एषां लघिष्ठं कमपि प्रति॥
यन्नाऽकुरुत सत्कर्म तन्नाकुरुत मां प्रति॥ २२८॥
इमे चाधार्मिकाः शास्तिं प्रयास्यन्ति सनातनीम्॥
निकरो धार्मिकाणां तु नित्यं यास्यति जीवनम्॥ २२९ ॥

॥ गुरुरुवाच ॥

संसारखिन्नचित्तानां क्षीयमात्रसुखार्थिनाम् ॥
धनिनां दुर्गतिः कीदृग् भवेदित्यादिशत् प्रभुः ॥ २३० ॥

॥ श्रीयेषूरुवाच ॥

आसीत् पुमान् धनी कश्चित् सूक्ष्मधूमलवस्त्रभृत् ॥
सन्तुष्टो भोजनादीना मुत्सवेन दिने दिने ॥ २३१ ॥
तद्गोपुरे च लाजारो नाम भिक्षुर्व्रणी स्थितः ॥
उच्छिष्टभोजनाथ्यकांक्षी श्वभिर्लीढव्रणः सदा ॥ २३२ ॥
मृत्वा तु स्वस्वरैः क्रोड मैब्राहीम मनायि सः ॥
पश्चाद् मृतः स इभ्योऽपि श्मशाने स्थापितोऽभवत् ॥ २३३ ॥
पातालस्थस्य पीडार्त्तो स पश्यन् दूरवर्त्तिनम् ॥
इब्राहीमं च तत्क्रोडे लाजारं चेद मब्रवीत् ॥ २३४ ॥

॥ धनी उवाच ॥

हे इब्राहीम लाजारं जलसिक्तांगुलिं पितः ॥
ज्वालाऽर्दितस्य मे जिह्वां शीतलां कर्त्तु मीरय ॥ २३५ ॥

॥ इब्राहीम उवाच ॥

शुभं त्वं लेभिषे जीवन् लाजारस्त्वाप्नुताऽशुभं ॥
किंत्विदानी मसौ शान्तिं लभते त्वं च वेदनाम् ॥ २३६ ॥
किंच युष्माक मस्माकं चान्तःस्थे दुस्तरे विले ॥
इतस्तत स्तितीर्षूणा मप्यसाध्यो गमागमः ॥ २३७ ॥

॥ गुरुरुवाच ॥

संसारलिप्तचित्तानां स्वीयमात्रसुखार्थिनाम् ॥
धनिनां दुर्गतिः कीदृग् भवेदित्यादिशत् प्रभुः ॥ २३० ॥

॥ श्रीयेषूरुवाच ॥

आसीत् पुमान् धनी कश्चित् सूक्ष्मधूमलवस्त्रभृत् ॥
सन्तुष्टो भोजनादीना मुत्सवेन दिने दिने ॥ २३१ ॥
तद्गोपुरे च लाजारो नाम भिक्षुर्व्रणी स्थितः ॥
उच्छिष्टभोजनाकांक्षी श्वभिर्लीढव्रणः सदा ॥ २३२ ॥
मृत्वा तु स्वस्वरैः क्रोड मैब्राहीम मनायि सः ॥
पश्चाद् मृतः स इभ्योऽपि श्मशाने स्थापितोऽभवत् ॥ २३३ ॥
पातालस्थस्य पीडार्त्तो स पश्यन् दूरवर्त्तिनम् ॥
इब्राहीमं च तत्क्रोडे लाजारं चेद मब्रवीत् ॥ २३४ ॥

॥ धनी उवाच ॥

हे इब्राहीम लाजारं जलसिक्तांगुलिं पितः ॥
ज्वालाऽर्दितस्य मे जिह्वां शीतलां कर्त्तु मीरय ॥ २३५ ॥

॥ इब्राहीम उवाच ॥

शुभं त्वं लेभिषे जीवन् लाजारस्त्वाऽस्नुताऽशुभं ॥
किंत्विदानी मसौ शान्तिं लभते त्वं च वेदनाम् ॥ २३६ ॥
किंच युष्माक मस्माकं चान्तःस्थे दुस्तरे विले ॥
इतस्तत स्तितीर्षूणा मप्यसाध्यो गमागमः ॥ २३७ ॥

॥ गुरुरुवाच ॥

ततः स वित्तवानूचे तर्हि त्वामर्थये पितः॥
लाजारं मत्पितुर्गेहं स्वसकाशात् समीरय ॥ २३८ ॥
ततो मे भ्रातरः पञ्च यथेमं यातनालयम्॥
नागच्छेयुस्तथा तस्य लभन्तामुपदेशनम्॥ २३९ ॥
इब्राहीमस्तु तं प्रोचे मोसिशास्त्रं धरन्ति ते॥
ग्रन्थांश्च भव्यवक्तॄणां मन्तुमर्हन्ति तद्वचः॥ २४० ॥
धनी तूचे पित नैवं प्रेतलोकात्तु कश्चन॥
तत्पार्श्वं चेद्दियात् तर्हि पश्चात्तापः क्रियेत तैः॥ २४१ ॥

॥ इब्राहीम उवाच ॥

ते मोसे भव्यवक्तॄणां चोक्तीर्न शृणुयुर्यदि ॥
तदा न जातु मन्येरन् अपि प्रेतं समुत्थितम्॥ २४२ ॥

॥ गुरुरुवाच ॥

स्वर्ल्लोके कीदृशं शर्म निर्मलं सद्भिराप्यते॥
इत्येवं नास्तिकान् कांश्चिद् यक्ष्द्या नादिशत् प्रभुः॥ २४३ ॥
यतः शादूक्यसंज्ञानां परलोकाद्यवादिनाम्॥
पाषण्डिनां जनाः केचिद् येषू पप्रच्छुरेकदा ॥ २४४ ॥

॥ शादूक्या ऊचुः ॥

हे गुरो मोसिरादेक्षीत् कोऽप्यपुत्रो म्रियेत चेत्॥
तदा तत्कुलरक्षार्थं तत्स्त्रीं भ्रातोद्वहेदिति ॥ २४५ ॥

सप्ताप्सन् भ्रातरोऽस्मास्तु तेषां ज्येष्ठे तु योषितं ॥
परिणीयाऽसुते प्रेते तत्पत्नी मनुजोऽग्रहीत् ॥ २४६ ॥
तस्मिं स्तथाऽसुते प्रेते तृतीयः सोदरः स्त्रियम् ॥
गृहीत्वाऽमृत निष्पुत्र स्तद्वत् तुर्यादयोऽपरे ॥ २४७ ॥
तत्सप्तानां वधूर्भूता शेषे साऽप्यबलाऽमृत ॥
अतः सा पुनरुत्थाने कतमस्य वधूर्भवेत् ॥ २४८॥

॥ श्रीयेषूरुवाच ॥

अत्र भ्रमोऽस्ति वः शास्त्रं शक्तिं चैशीमजानतां ॥
एतस्य जगतो लोका ऊह्यन्ते विवहन्ति च ॥ २४९ ॥
पात्राणि ये तु गण्यन्ते समारोढुम् अदो जगत् ॥
पुनरुत्थानभाजस्ते नोह्यन्ते नोद्वहन्ति वा ॥ २५० ॥
ते हि मर्त्तुं न शक्यन्ति स्वर्दूतैः सन्निभाः स्थिताः ॥
ईशस्य चात्मजाः सन्ति पुनरुत्थानसंभवाः ॥ २५१ ॥

॥ गुरुरुवाच ॥

एवं स सान्त्वयन् शान्तान् अशमचित्तांस्तु भाययन् ॥
समस्तान् सद्गतिं नेतुं चिचष्टे परमो गुरुः ॥ २५२ ॥

इति श्रीमहामोक्तृयेषूख्रष्टमाहात्म्ये जगद्गुरूपदेशमाला नाम चतर्थोऽध्यायः ॥

---

॥ शिष्य उवाच ॥

नृपुत्रः सेवनं लब्धुं नाययौ किंतु सेवितुं ॥
अनेकेषां च निष्कृत्यै विस्रष्टुं निजजीवनं ॥ १ ॥

ततश्च प्रायशो धूर्ता अपि दुष्टहृदश्च ते ॥
वाह्याचारस्य पुण्यत्वाल् लोके प्रापु र्महादरं ॥ १९ ॥
येषूस्तु मलशास्त्रस्य तथ्य मर्थं प्रकाशयन् ॥
मतं चोपदिशन् नूतं तेषां विद्यां निराकरोत् ॥ २०॥
नवीने सत्तरे शास्त्रे नृषु ह्यैशे प्रचारिते ॥
अचिरात् मलशास्त्रार्थज्ञातॄणां गौरवं ह्रसेत्॥ २१॥
अन्यच्च वाह्यतः शुद्धान् अन्तरे तु मलीमसान् ॥
तान् येषू श्चित्तमर्मज्ञः सम्प्रकाश मभर्त्सयत्॥ २२ ॥
अत स्तद्भर्त्सनाद् रुष्टा स्ते स्वपुण्याभिमानिनः ॥
स्वच्छद्मवेषहर्तारं प्रतिकर्त्तुं चिचेष्टिरे ॥ २३ ॥
अन्यच्च भाविन स्वातु विषये भव्यवक्तृभिः ॥
यदुक्तं तस्य तत्वं ते नावजग्मु र्भ्रमान्विताः ॥ २४ ॥
असौ राजप्रतापेन प्रादुर्भूय महाबलः॥
अस्मत्साद् मेदिनीं कुर्या दित्याशां चक्रिरे हथा ॥ २५ ॥
नैषीद् येषूस्तु साम्राज्यं संस्थापयितु मैहिकं ॥
स्रष्टुं तु धर्मसाम्राज्यं नष्टपापपराक्रमं ॥ २६ ॥
तादृशं धर्मराज्यं तु धर्मरवे उदासिनः ॥
संसारासक्तचेतस्का स्तिरस्चक्रु र्यहूदिनः ॥ २७ ॥
इत्यादिकारणाद् येष्वे द्रुह्यन्तस्ते दुरात्मकाः ॥
सुयोगं तस्य घातार्थं ततोऽन्वेष्टुं प्रचक्रिरे ॥ २८ ॥
तज्ज्ञात्वैकः प्रभोः शिष्यो यूदाख्यो लोभकर्षितः ॥
द्विषा मर्पयितुं हस्ते स्वं नाथं समकल्पयत् ॥ २९ ॥

ततोऽमीषां प्रधानानां यज्वनां पार्श्वमागतः ॥
तैः सार्द्धं संविदं चक्रे तद्धस्तेऽर्पयितुं प्रभुं ॥ ३० ॥
तुष्टास्तु तद्गिरा द्रव्यं दातुं ते प्रत्यजानत ॥
दुरभिप्रायसिद्धौ च स सुयोग मचेष्टत ॥ ३१ ॥
तस्मिन्नवसरे येषूः संन्ध्यायां शिष्यसंयुतः ॥
निस्तारोत्सवसम्पत्त्यर्थं राजधानीं समागमत् ॥ ३२ ॥
प्रवृत्ते भोजने शिष्या नुद्दिग्नः प्रभु रब्रवीत् ॥
युष्मन्मध्ये पुमानेको मां परेष्वर्पये दिति ॥ ३३ ॥
यूदाख्योऽसौ शठः शिष्यै स्तत्राऽऽसीनोऽ परैः सह ॥
प्रभूक्त मिंगितं श्रुत्वा सदनाद् निर्ययौ ततः ॥ ३४ ॥
शिष्यांस्ततोऽ चिराद् भव्यं जगतोऽपगमं निजं ॥
विज्ञाप्य सान्त्वयामास वाक्यैः शान्तिप्रदैः प्रभुः ॥ ३५ ॥
स्वर्लोकारोहणात् पश्चादपि तांश्च प्ररक्षितुं ॥
ऐश्वया नाययितुं शक्त्या चेति चक्रे प्रतिश्रवम् ॥ ३६ ॥
ततः शिष्यान्वितो येषू र्निष्क्रान्तो नगराद् निशि ॥
प्राविशत् किंचिदुद्यानं प्रार्थनां कर्तु मुद्यतः ॥ ३७ ॥
खिन्नात्मा चार्थयत् तात यदि शक्यं तदा मया ॥
इदं मा भुज्यतां दुःखं यथा त्विच्छे स्तथा स्त्विति ॥ ३८ ॥
तस्मिन्नवसरेऽनेकै रन्वितः शस्त्रधारिभिः ॥
प्रभुं धारयितुं यूदस् तदुद्यानं समागमत् ॥ ३९ ॥
यं चुम्बेयं स एवासा विति संकेत मग्रतः ॥
संगिभ्यो दत्तवान् येषूं शठश्चुम्बितु माययौ ॥ ४० ॥

विश्वासघ्नंतु तं येषूः प्रोचे कस्मै त्वमागतः ॥
नृपुत्रं परहस्तेषु चुम्बनेन किमर्पयेः ॥ ४१ ॥
ततोऽस्त्रधारिभि र्येषुवि धृते तस्याऽनुयायिनः ॥
प्रोचुः किं प्रहरिष्यामो वयं तान् असिना प्रभो ॥ ४२ ॥
एकः शिष्यस्त्व पत्राख्यः खड्गधारी विपश्चिताम् ॥
कश्चित् प्रहृत्य खड्गेन कर्णं चिच्छेद दक्षिणं ॥ ४३ ॥
अनेनाल मिति प्रोच्य छिन्नकर्णं जनं प्रभुः ॥
स्पृशन् सुस्थं व्यधात् सद्यः शिष्यं चैव सभाषत ॥ ४४ ॥

॥ श्रीयेषूरुवाच ॥

स्वतातं प्रार्थ्य दूतानां द्वादशभ्योऽधिका स्वमूः ॥
अहं न शक्नुयां लब्धु मिति किं मन्यते त्वया ॥ ४५ ॥
परंतु चेत् तथा कुर्यां तर्हि यान्युद्दिशन्ति मां ॥
प्राचीनशास्त्रवाक्यानि तेषां सिद्धिः कथं भवेत् ॥ ४६ ॥

॥ गुरुरुवाच ॥

तदा येषू मरुन्धन्त मपि बद्ध्वा पदातयः ॥
श्रेष्ठस्य यज्वनः सद्म निन्युः शिष्यै र्विवर्जितं ॥ ४७ ॥
ततः प्रधानयज्वाऽसौ शिष्याणां च मतस्य च ॥
उद्देशे पृष्टवान् येषूं लेभे चेदृश मुत्तरम् ॥ ४८ ॥

॥ श्रीयेषूरुवाच ॥

यत्र सर्वे समायान्ति यहूदा भजनालये ॥
मन्दिरे च सदा तत्र सप्रकाश मशिक्षयम् ॥ ४९ ॥

रहस्यं नावदं किंचिद् मां किमर्थाय पृच्छसि ॥
श्रोतारो मे तु पृच्छ्यन्तां मदुक्तानि विदन्ति ते ॥ ५० ॥

॥ गुरुरुवाच ॥

दुष्टास्तु बधदण्डार्हं येषूं निर्णेतु मिच्छवः ॥
यज्ञ्वानः साक्ष्य मन्वैच्छन् किंचिद् नापु स्तु संगतं ॥ ५१ ॥
तत्पश्चाद् अयिमो यज्वा समुत्थायाब्रवीत् प्रभुं ॥
निशम्य साद्यय मेतेषा मुत्तरं किं न यच्छसि ॥ ५२ ॥
इदंतु यज्वना प्रोक्त मपि श्रुत्वाऽनघः प्रभुः ॥
नायच्छ दुत्तरं किंचित् ततोऽसौ पुन रब्रवीत् ॥ ५३ ॥

॥ अयिमो यज्वोवाच ॥

अमरेणेश्वरेण त्वां शापयामि त्वयोच्यतां ॥
किं खृष्टः परमेशस्य सूनु स्त्वं विद्यसे न वा ॥ ५४ ॥

॥ श्रीयेषूरुवाच ॥

त्वदुक्तः सोऽहमेवास्मि, सर्वशक्तेस्तु दक्षिणे ॥
नृपुत्रं द्रक्ष्यथाऽऽसीन मायान्तं च घनोपरि ॥ ५५ ॥

॥ गुरुरुवाच ॥

तच्छ्रुत्वा सोऽयिमो यज्वा वस्त्रं छित्वा सभास्थितान् ॥
यज्वादीनितरान् प्रोचे निन्दत्येष परेश्वरम् ॥ ५६ ॥
अधिकेनाऽधुनाऽस्माकं किं साक्ष्येण प्रयोजनम् ॥
निन्दा भवद्भि रश्रावि भवता मत्र किं मतम् ॥ ५७ ॥

तन्निशम्य विरोधान्धाः सकला दोषवर्जितम् ॥
श्रीयेषूं बधदण्डार्हं विनिर्णिन्युः सभासदः ॥ ५८ ॥
ततः केचन निष्ठीवं तस्य वक्त्रे निचिक्षिपुः ॥
चपेटैः प्राहरन्नन्ये उपहासं च चक्रिरे ॥ ५९ ॥
यत्काले श्रीप्रभु र्येषू र्बभ्राजे भूमिमण्डले ॥
तदा रौम्यस्य सम्राजो निघ्ना आसन् यहूदिनः ॥ ६० ॥
सम्राजा चामुना कश्चिन् नियुक्तो राष्ट्रशासने ॥
पीलातनामकोऽध्यक्षो तत्र नीवृत्यवर्तत ॥ ६१ ॥
अतः सभासदः सर्वे बध्यं निर्णीय सत्प्रभुं ॥
बधायाऽनुमतिं लब्धुं निन्युः पीलातसन्निधिम् ॥ ६२ ॥
ऊचिरे चाय मात्मान मभिषिक्तं नृपं वदन् ॥
लोकान् रौम्याय सम्राजे बलिं दातुं निषेधति ॥ ६३ ॥
ततोऽध्यक्षः प्रभुं पृष्ट्वा त्वं किं राजा यहूदिनाम् ॥
इत्येत दुत्तरं प्राप मम राज्यं न लौकिकं ॥ ६४ ॥
लौकिकं ह्यभविष्यच्चेद् राज्यं मे तर्हि मामकाः ॥
भृत्या मा रक्षितुं हस्ता दयोत्स्यन्त विरोधिनाम् ॥ ६५ ॥
परन्तु वस्तुतो राज्यं मम तादृङ् न विद्यते ॥
सत्यस्य भवितुं साक्षी जगत्या मह मागतः ॥ ६६ ॥
एतन्निशम्य पीलातो याजकादी नभाषत ॥
एतस्मिन् पुरुषे दोषमहं नाप्नोमि कंचन ॥ ६७ ॥
तच्छ्रुत्वा यज्वनां श्रेष्ठा अभियोक्तुं प्रभुं पुनः ॥
प्रावर्तन्त सुवेगेन किन्त्वसौ नीरवः स्थितः ॥ ६८ ॥

तत्पश्चात् पुन रध्यक्षो यहूदा नब्रवी दिदम्॥
युष्माभि रभियुक्तोऽयं निर्दोषः प्राप्यते मया ॥ ६९ ॥
अनेन बधदण्डार्हा न कृता काऽपि दुष्क्रिया ॥
अतस्तं ताडयित्वाऽहं मोचयिष्यामि बन्धनात् ॥ ७० ॥
इति प्रोवाच पीलातो बधाद् येषूं रिरक्षिषन् ॥
कशाताडनमात्रेण द्विषा मीर्ष्यां तितर्पिषन् ॥ ७१ ॥
ततोऽध्यक्षः कशाघातै र्येषूं प्राहारयद् भृशम् ॥
सैन्याश्च निर्दयाः क्लिष्टं बाधितु मारभन्त तं ॥ ७२ ॥
धूम्राभं राजवस्त्रं हि गृहीत्वा पर्यधापयन् ॥
किरीटं कण्टकै र्बद्धा चार्पयंस्तस्य मस्तके ॥ ७३ ॥
प्रणम्य चोपहासेन तिरस्कृत्य ववन्दिरे ॥
नमो यहूदिनां राज्ञे तुभ्य मित्यादिवादिनः ॥ ७४ ॥
ततो यहूदिनां हृत्सु करुणोत्पादनेच्छया ॥
पीलातो वहिरानीय साक्षाद् अस्थापयत् प्रभुं ॥ ७५ ॥
धूम्रैः परिहितं वस्त्रैः कण्टकैश्च किरीटिनम् ॥
तं क्लिष्टं दर्शयं श्चोचे नरोऽयं दृश्यता मिति ॥ ७६ ॥
येषूंतु श्रेष्ठयज्वाद्या दृष्ट्वा नेदु र्मुहुर्मुहुः ॥
शूलेऽयं विध्यतां शूले विध्यता मितिवादिनः ॥ ७७ ॥
पीलात स्त्ववदद् यूयं शूले तंविध्यत स्वयं ॥
यतः कोऽपि मया तस्मिन्नपराधो न दृश्यते ॥ ७८ ॥
ततो यहूदिनः प्रोचु रस्मच्छास्त्राऽनुसारतः ॥
बधार्होऽयं यतः स स्व मीशपुत्र मकल्पयत् ॥ ७९ ॥

एतद् निशम्य पीलातो भीतवान् राजसद्मनि॥
प्रविश्य प्रभु मप्राक्षीत् समुत्पत्तिः कुत स्तव॥ ८० ॥
तत्प्रश्नस्योत्तरं किंचिद् नाप्त्वाऽध्यक्षोऽब्रवीत् पुनः ॥
किं मह्यं पृच्छते किंचि दुत्तरं न प्रदास्यसि॥ ८१ ॥
शूले व्याधयितुं वा त्वां किंवा मोचयितुं बधात्॥
अधिकारो ममाऽस्तीति किं न विज्ञायते त्वया ॥ ८२ ॥
तच्छ्रुत्वा त्ववदद् येषू रीशश्चेद् नान्वमंस्यत ॥
तदा कोऽप्यधिकार स्ते नाभविष्यन् ममोपरि॥ ८३ ॥
ततो मोचयितुं येषू मध्यक्षः पुन रैहत ॥
ज्ञात्वा तु तस्य संकल्पं प्रोचै र्नैदु र्यंहूदिनः ॥ ८४ ॥

॥यहूदिन ऊचुः ॥

चेदेनं मोचये स्तर्हि सम्राजो न भवेर्हितः॥
यो ह्यात्मानं नृपं वक्ति सम्राजं विरुणद्धि सः॥ ८५ ॥

॥ गुरुरुवाच ॥

तदानीं प्रभु मुद्वर्तुं व्यर्थं पश्यन् स्वचेष्टनम्॥
करौ प्रक्षाल्य पीलातो लोकसाक्षा दभाषत॥ ८६ ॥

॥ पीलात उवाच ॥

सतोऽस्य रक्तपातस्य विषये निर्मलोऽस्म्यहं ॥
एतद्दुष्कर्मणो जन्यं युष्माभिर्भुज्यतां फलम्॥ ८७ ॥

॥ गुरुरुवाच ॥

तदा लोकाः समे प्रोचुः फलं तद्रक्तपातजं ॥
अस्माभि रस्मदीयश्च सन्तानै र्भुज्यता मिति॥ ८८ ॥

ततोऽध्यक्षः प्रभुं तेषु शूले व्यङ्कुं समार्पयत् ॥
गृहीत्वा ते च तं निन्यु र्दण्डनाय पुराद् बहिः ॥ ८९ ॥
तथा शूलं वहन् स्कन्धे निश्चक्राम पुरात् प्रभुः ॥
मार्गे गच्छंस्तु चक्लाम शूलभारेण पीडितः ॥ ९० ॥
अत स्तद्रक्षका यान्तं प्राप्य कंचिज्जनं पथि ॥
शूलं वोढुं प्रभोः पश्चात् तस्य स्कन्धे समार्पयन् ॥ ९१ ॥
एवं व्यूहेन लोकानां महता सहितः प्रभुः ॥
स्त्रीभिश्च विलपन्तीभि रुपतस्थे बधालयम् ॥ ९२ ॥

॥ शिष्य उवाच ॥

यं दण्डनाय बध्यानां रोमिणो व्यवजह्रिरे ॥
स किंप्रकारकः शूल आसी दित्थं गुरो वद ॥ ९३ ॥

॥ गुरुरुवाच ॥

शूल स्तै रोमिभि र्द्वाभ्यां दारुभ्यां निरमीयत ॥
तदेकं लम्ब मन्यच्च तिर्यक् तस्मिन्ननह्यत ॥ ९४ ॥
यत्नस्याधस्तने भागे दृढमारोपिते भुवि ॥
सार्द्धव्यामोन्नतं तस्थौ तिर्य्यक् काष्ठं महीतलात् ॥ ९५ ॥
तस्मिंस्तिरश्चि काष्ठे तु विततौ दोषिणः करौ ॥
लौहैः कीलै रबध्येतां पादौ लम्बे च दारुणि ॥ ९६ ॥
विद्धाङ्घ्रिपाणय स्तद्व ल्लम्बमानाश्च दोषिणः ॥
सुतीव्रां वेदनां भुक्त्वा शनैः पंचत्व माप्नुवन् ॥ ९७ ॥

श्रोयेषूं तद्विधे शूले विव्यधु र्दण्डपाशिकाः ॥
द्वयो स्तस्करयो र्मध्ये दोषवन्त मिवाऽनघं ॥ ९८ ॥
तदानीं भव्यवाद्युक्तं सिद्धिं प्राप्नोदिदं वचः ॥
नृणां दुष्कर्मणां मध्ये गणितोऽभूदसा विति ॥ ९९ ॥
तन्मस्तकोपरीयं च त्रिभाषा लिपि रार्प्यत ॥
येषू नंसरतोयोऽय मस्ति राजा यहूदिनां ॥ १०० ॥
विद्धांगो यातनां तीव्रां भुञ्जानोऽप्यार्थयत् प्रभुः ॥
क्षमस्व तान् पित र्यद्धि कुर्वते तन्न जानते ॥ १०१ ॥
तदानीं श्रेष्ठयज्वाद्या उपहस्याऽब्रुवन् मिथः ॥
ररक्ष सोऽपरान् किंतु स्वं न शक्नोति रक्षितुम् ॥ १०२ ॥
स चेद् यहूदिनां राजा शूलात् तर्ह्यवरोहतु ॥
तद् दृष्ट्वा प्रत्ययं तस्मिन् करिष्याम स्तदा वयम् ॥ १०३ ॥
स स्वमीशात्मजं प्रोचे व्यश्वसीच्च परेश्वरे ॥
चेदीशः प्रीयते तस्मिं स्तर्हीदानी मवत्विति ॥ १०४ ॥
परंतु स्तेनयोरेकः समीपे लम्बमानयोः ॥
प्रभो र्विवच्य माहात्म्यं सविश्वासोऽब्रवीदिदं ॥ १०५ ॥

॥ दस्युरुवाच ॥

यस्मिन्ननेहसि स्वेन राजत्वेनागमिष्यसि ॥
तदानीं मां प्रसादेन स्मरेति प्रार्थये प्रभो ॥ १०६ ॥

॥ गुरुरुवाच ॥

तस्य विश्वासिनः श्रुत्वा प्रार्थनां प्रभु रुक्तवान् ॥
अद्यैव त्वं मया सार्द्धं सुखोद्यान मवाप्स्यसि ॥ १०७ ॥

ततश्छन्ने रवौ ध्वान्तं द्वितीयप्रहराऽवधि ॥
तृतीययामपर्य्यन्तं सर्वं देशं समावृणोत् ॥ १०८ ॥
तृतीये प्रहरे येषू रवेव मुच्चै रुदैरयत् ॥
हे मदीश मदीयेश कुतो मा विससर्ज्जिथ ॥ १०९ ॥
ततोऽचिरात् परं येषू रूचे सिद्ध मभूदिति ॥
हे पित स्तावके हस्ते स्वमात्मानं समर्पये ॥ ११० ॥
तथाऽऽत्मानं बलिं दत्वा नृत्राणायेश्वरेच्छया ॥
मूर्द्धानं नमयन् येषू र्निजप्राणानवर्जयत् ॥ १११ ॥
तद्देशमन्दिरस्यान्तः प्रतिसीरा व्यदीर्यत ॥
वसुन्धरा चकम्पे च पुस्फुटुश्च शिलोच्चयाः ॥ ११२ ॥
यस्त्वाऽऽसीत् शतसैन्येशो नियुक्तो रक्षणे प्रभोः ॥
स भूकम्पादि दृष्ट्वोचे नितराम् अयमीशजः ॥ ११३ ॥
पश्चात् कश्चित् प्रभो र्भक्तो योसेफाख्यो महाजनः ॥
पीलातसन्निधिं गत्वा येष्वो देह मयाचत ॥ ११४ ॥
तल्लब्ध्वा शुचिवस्त्रेण वेष्टयित्वा स धार्म्मिकः ॥
निजे नूत्ने शिलाखाते श्मशानेऽन्तः समार्पयत् ॥ ११५ ॥
येष्वो देहं तु शिष्याणां कोऽपि हर्तुं न शक्नुयात् ॥
इत्याशयेन यज्वाग्र्याः श्मशानं समरक्षयन् ॥ ११६ ॥

इति श्रीयेषूखृष्टमाहात्म्ये येष्वः प्राणसमर्पणं नाम
पञ्चमोऽध्यायः ॥

---

शिष्य उवाच ॥

श्मशानात् पुनरुत्थाता तृतीयेऽह्नि नरात्मजः ॥
इत्येतत् सत्प्रभो र्वाक्यं कथं सिद्ध मभूद् गुरो ॥ १ ॥

॥ गुरुरुवाच ॥

प्रभु र्महाद्भुतां शक्तिं दर्शयित्वा प्रतापवान् ॥
बलं भंजयाद् द्विषा मित्थ मनुगा स्तस्य मेनिरे ॥ २ ॥
यदा तु शत्रवो येषूं अरुन्धन्त ममारयन् ॥
भग्नाशास्ते तदा सर्वे शिष्या जग्मु र्विषण्णतां ॥ ३ ॥
मुहुर्मुहुश्च यां जीवन् प्रभुः स्वां पुनरुत्थितिं ॥
भविष्यन्तीं पुरा प्रोचे तां ते सम्यग् विसस्मरुः ॥ ४ ॥
यस्मिन् दिने हतो येषूः श्मशानेऽन्त र्न्यधीयत ॥
स घस्रः शुक्रवारोऽभूद् विश्रमाहश्च तत्परे ॥ ५ ॥
सर्वदा शनिवारं हि पुण्यं मत्वा यहूदिनः ॥
क्रियाश्च लौकिकी स्त्यक्त्वा तदा विश्रम माचरन् ॥ ६ ॥
व्यतीते विश्रमाह्ने तु प्रत्यूषे रविवासरे ॥
प्रभुभक्ताः स्त्रियः काश्चित् श्मशानं द्रष्टु माययुः ॥ ७ ॥
श्मशानं तद् गुहारूपमासीत् खातं शिलोच्चये ॥
ग्राव्णा चारुध्यत द्वारं प्रभो र्देहार्पणादनु ॥ ८ ॥
प्रत्यूषे रविवारे तु भूमिकम्पोऽभवद् महान् ॥
स्वर्दूतश्चागतो द्वारात् पाषाणं निरसारयत् ॥ ९ ॥
रूपं तडिद्वदोजस्वि तस्य गव्हररक्षकाः ॥
पश्यन्तः कम्पिता भीत्या मृतकल्पा इवाभवन् ॥ १० ॥

पश्चादुपस्थिता स्तत्र प्राविशन् गह्वरं स्त्रियः ॥
ह्रतं त्वासीन मालोक्य विस्मयं परमं ययुः ॥ ११ ॥
दूत स्तूवाच जीवन्तं येषूमत्र मृतालये ॥
मृगयध्वे कुतो यूयं सोऽत्र नास्त्युत्थितोऽस्ति सः ॥ १२ ॥
ततस्ता योषितो भीता निर्ययु र्गह्वराद् वहिः ॥
शिष्यान् ज्ञापयितुं वार्तां दुद्रुवुश्च मुदाऽन्विताः ॥ १३ ॥
ततो योहन्निसंज्ञस्य पित्राख्यश्चाऽनुगौ प्रभोः ॥
वार्तां श्रुत्वाऽऽगतौ तत्र गुहां शून्यामविन्दतां ॥ १४ ॥
त्यक्तान्युत्तिष्ठता येश्वा शाववासांसि केवलम् ॥
विलोक्य तौ पुन र्गेहं ततोऽयातां चमत्कृतौ ॥ १५ ॥
ततोऽकस्मात् प्रभुः स्त्रीणामेकस्यै दर्शनं ददौ ॥
सा त्वाचार्येति शब्देन सद्गुरुं समबोधयत् ॥ १६ ॥
प्रभोश्च प्राप्य सन्देशं शिष्यवर्गान्तिकं गता ॥
सा तस्य दर्शनं प्रोचे तदुक्तानि वचांसि च ॥ १७ ॥
तया तु ज्ञापिताः शिष्या येषू रुत्थितवानिति ॥
तद्वच्च स्त्रीभि रन्याभि स्तद्वार्तां न विशश्वसुः ॥ १८ ॥
तस्मिन्नेव दिने कंचिद् ग्रामं यान्तौ महापुरात् ॥
द्वौ शिष्यौ प्रभु मुद्दिश्य संलापं चक्रतु र्मिथः ॥ १९ ॥
तदा येषू रुपस्थाय स्वयं ताभ्यां सहाऽचलत् ॥
रुद्धेक्षणौ तु शिष्यौ न पर्यचैष्टां निजं प्रभुं ॥ २० ॥
येषूस्तु तौ तदाऽप्राक्षीद् युवां किंविषये मिथः ॥
संलापं कुरुथो यान्तौ विषण्णौ सरणाविति ॥ २१ ॥

तयो रेकस्तु तं प्रोचे विदेशीयोऽपि सन् भवान् ॥
यद्य घटितं सर्वं किंन तज्ज्ञातवानिति ॥ २२ ॥
येषूः पप्रच्छ तत् कीदृगिति तौ त्विव मूचतुः ॥

॥ शिष्यावूचतुः ॥

श्रीयेषूद्देशि तत्सर्वं घटनं ज्ञायतां त्वया ॥ २३ ॥
अमुमाद्यं महाचार्यम् अस्मद्देशाधिकारिणः ॥
बध्यं निर्णीय दण्डाय परहस्ते समार्पयन् ॥ २४ ॥
परंतु वंश मस्माकं यो महात्मा समुद्धरेत् ॥
स एवायं भवेदित्थं प्रत्याशा नोऽभवद् दृढा ॥ २५ ॥
वाचा च निजवर्ग्याणां स्त्रीणां विस्मापिता वयं ॥
श्मशानं वीक्षितुं गत्वा ता ह्नि नापुः प्रभो र्वपुः ॥ २६ ॥
स जीवतीति वृत्तान्तं स्वर्दूतानां मुखाच्छ्रुतं ॥
ता नार्य्योऽज्ञापयन्नस्मान् श्मशानात् पुनरागताः ॥ २७ ॥
तत्पश्चात् केचनास्माकं गत्वा स्त्रीभि र्यथोदितं ॥
तथैव प्राप्नुवन् किंतु नापश्यन् कुत्रचित् प्रभुं ॥ २८ ॥

॥ गुरुरुवाच ॥

तयो र्विषण्णयो रेतद् वाक्यं श्रुत्वाऽब्रवीत् प्रभुः ॥

॥ श्रीयेषूरुवाच ॥

हे भव्यवादिवाक्यानां प्रत्यये मन्दमानसाः ॥ २९ ॥
स्वष्टाख्येनाभिषिक्तेन किं न प्राग् दुःखसंचयः ॥
भोक्तव्योऽभूत् तत स्तेन प्राप्तव्यो महिमा निजः ॥ ३० ॥

॥ गुरुरुवाच ॥

इत्युक्त्वा मोसि मारभ्य भविष्यद्वाचकोक्तिषु ॥
यत् खस्य विषये प्रोक्तं तत्सर्वं व्याज्ञयत् क्रमात् ॥ ३१ ॥
शेषे यमव्रजन् ग्रामं तत्समीपं यदाव्ययुः ॥
तदा निमन्त्रित स्ताभ्यां श्रीयेषूः प्राविशद् गृहं ॥ ३२ ॥
भोजने चोपविष्टेषु तेषु पूपं गृहीतवान् ॥
भंक्त्वाच सोऽददात् ताभ्या मीश्वरस्तुतिपूर्वकं ॥ ३३ ॥
तस्मात् प्रसन्नया दृष्ट्या तौ तं प्रत्यभिजज्ञतुः ॥
सद्यस्तु सोऽतिथि र्दिव्यः शालातोऽन्तरधीयत ॥ ३४ ॥
तस्मिन्नेव दिने सायं शिष्या यत्र समागमन् ॥
शालायां तत्र रुद्धेऽपि द्वारेऽन्तः प्राविशत् प्रभुः ॥ ३५ ॥
शिष्यास्तु दर्शनात् तस्य महाभीत्या परिप्लुताः ॥
अस्माभि दृश्यते भूत इति बुद्धिमकुर्वत ॥ ३६ ॥
येषू स्तूचे कुतो यूयं संजाताः क्षुब्धमानसाः ॥
इमे कुतस्च संदेहाः प्रजायन्ते मनस्सु वः ॥ ३७ ॥
हस्तौ पादौ च मे दृष्ट्वा वरं स्पृष्ट्वा विनिश्चयम् ॥
कुरुध्वं स्वयमेषोऽहं, भूतो मांसाऽस्थिमान् नहि ॥ ३८ ॥
ततो हस्तौ च पादौ च निजौ कीलव्यधाङ्कितौ ॥
स शिष्यान् दर्शयामास निश्चयोत्पत्तिहेतवे ॥ ३९ ॥
ततोऽपि नन्दयो र्हेतो स्तेऽशङ्कन्त चमत्कृताः ॥
तद् दृष्ट्वा तु प्रभुः किंचित् तत्साक्षाद् आद भोजनं ॥ ४० ॥

पश्चात् पुनःपुन र्यैषू श्चत्वारिंशद्दिनावधि ॥
शिष्येभ्यो दर्शनं दत्वा तैः सार्द्धं समभाषत ॥ ४१ ॥
तेभ्यः प्राचीनशास्त्रार्थे बोधशक्तिं प्रदाय च ॥
नूत्नस्य स्वस्य धर्मस्य सर्वतत्त्वान्यशिक्षयत् ॥ ४२ ॥
अचिराच्च क्षितिं त्यक्ष्यन् स्वान् शिष्यान् अग्रिमान् प्रभुः ॥
इत्थं सर्वत्र धर्मस्य प्रचारार्थं न्ययोजयत् ॥ ४३ ॥

॥ श्रीयिषूरुवाच ॥

मयि भूस्वर्गयो स्तावान् अधिकारः समार्प्यत ॥
अतः सर्वेषु देशेषु सुसंवादः प्रचार्य्यताम् ॥ ४४ ॥
प्रत्येतॄणां गणो नाम्ना पितृपुत्रसदात्मनाम् ॥*
अम्भःसंस्कार माप्नोतु मद्धर्मं चोपदिश्यताम् ॥ ४५ ॥
अहं च जगतः शेषपर्यन्तमपि शिक्षकैः ॥
युष्माभिः सह तिष्ठामि सहायः सर्वदा स्वयम् ॥ ४६ ॥

॥ गुरुरुवाच ॥

शेषे तानेव माज्ञाप्य दत्तवांश्चाशिषं प्रभुः ॥
तत्साक्षादूर्द्ध्वमारुह्य मेघच्छन्नस्तिरोदधे ॥ ४७ ॥
ऊर्द्ध्वं यान्तं तु तं शिष्या विलोक्याऽनन्यदृष्टयः ॥
अन्तर्हितं च वन्दित्वा राजधानीं समागमन् ॥ ४८ ॥
ततस्ते तत्र तिष्ठन्तः सविश्वासाः प्रभूदितं ॥
पवित्रस्याऽऽत्मनो भव्यं प्रत्यैक्षन्ताऽवरोहणं ॥ ४९ ॥

---

* सदात्मा पवित्रात्मा चेति द्वौ शब्दौ समानार्थौ बोध्यौ ॥

दशभ्यो वासरेभ्योऽनु लक्षणैः सूचितोऽद्भुतैः ॥
स शक्तिदः पवित्रात्मा शिष्यस्वान्तेष्ववातरत् ॥ ५० ॥
तस्माद् विदेशिभाषाणां ज्ञानं ते लेभिरेऽद्भुतं ॥
स्वधर्ममर्मणां बोधे धीदृष्टेश्च प्रसन्नतां ॥ ५१ ॥
सद्यश्च निर्भया भूत्वा ते प्रभोः पुनरुत्थितिं ॥
स्वर्गारोहं च तद्वत्तृपुरमध्येऽप्यघोषयन् ॥ ५२ ॥
युष्माभिः शूलदण्डेन यः श्रीयेषू रहन्यत ॥
तमभ्यषिञ्च दैश्वर्यै चातृत्वे च परेश्वरः ॥ ५३ ॥
असावेवाऽपराधानां क्षमां दातुं नियोजितः ॥
कस्मादप्यपरा ज्जातु त्राणं लब्धुं न शक्यते ॥ ५४ ॥
पश्चात् स्वदेशसीमानमतिक्रम्य महोद्यमाः ॥
भूयस्तु ते विदेशेषु प्रभो र्धर्म मकीर्तयन् ॥ ५५ ॥
मूर्त्यर्चकांश्च तत्रत्यांल्लोकानेव मुपादिशन् ॥
स्वान् देवान् कल्पितांस्त्यक्त्वा सत्यं सेवध्व मीश्वरं ॥ ५६ ॥
व्यर्थाभी रीतिभि र्यूयं यमज्ञात्वा समर्चथ ॥
वयं वस्तस्य माहात्म्यं ज्ञापयामो यथातथं ॥ ५७ ॥
ईशो यो जगदस्राक्षीद् मेदिनीस्वर्गयोः प्रभुः ॥
सोऽनन्तो नरसृष्टेषु मन्दिरेषु न तिष्ठति ॥ ५८ ॥
स्वयं जीवस्य दाता सन् पालकश्च प्रजाततां ॥
वाह्यां नापेक्षते सेवा मसिद्धार्थ इवेश्वरः ॥ ५९ ॥
अतो यस्य स्थ सन्ताना यूयं येन च जीवथ ॥
स आश्मरौप्यहैमादिमूर्तित्वेन न बुध्यतां ॥ ६० ॥

पूर्वेष्वज्ञानकालेषु व्यतीतेष्वीश्वरोऽधुना ॥
आदिशत्यखिलान् मर्त्यान् स्वपापेभ्यो निवर्त्तितुं ॥ ६१ ॥
यतः स स्वसुतं येषूं महाघस्रे निरूपिते ॥
नृजातः सदसत्कर्मविचाराय न्ययोजयत् ॥ ६२ ॥
तं यावन्तस्तु मोक्तार माश्रयन्त्यनुतापिनः ॥
चरन्ति धर्ममार्गं च तावतां सद्गति र्भवेत् ॥ ६३ ॥
इत्याद्यै र्वचनै स्तेषां नानाश्चर्यक्रियाऽन्वितैः ॥
आकृष्टा भूरयो लोका येषूखृष्टे विश्वश्रवसुः ॥ ६४ ॥
तद्धर्मस्योदयं दृष्ट्वा संसारस्याऽधिकारिणः ॥
बलात्कारादिना तस्य वृद्धिं रोद्धुं चिचेष्टिरे ॥ ६५ ॥
यथा क्लिष्टाश्च खृष्टीया निह्नवीरन् निजं प्रभुं ॥
तथा तान् निष्ठुरा भूपा नानादण्डै र्बबाधिरे ॥ ६६ ॥
अनेके तु प्रभोः भक्त्या भूत्वा निश्चलचेतसः ॥
धैर्येण सेहिरे क्लेशान् न चेलुश्च बधादपि ॥ ६७ ॥
तद्रक्तरूपवीजं च नृणां हृत्स्विव रोपितं ॥
नवीनशिष्यरूपाणि शस्यानीवोदपादयत् ॥ ६८ ॥
तथा खृष्टीयधर्मोऽयं व्यस्तृणोद्द उत्तरोत्तरम् ॥
लुप्तेषु चान्यधर्मेषु प्रतीचीं व्याप केवलः ॥ ६९ ॥
इति श्रीयेषूखृष्टमाहात्म्ये श्रीयेष्वः स्वर्गारोहणं नाम
षष्ठोऽध्यायः ॥
समाप्तं चेदं श्रीयेषूखृष्टमाहात्म्यमिति ॥

## शुद्धिपत्रं।

| पत्रे | पंक्तौ | अशुद्धं | शुद्धं |
|---|---|---|---|
| ३ | १ | सदृशाकष्ट | सदृशा कष्ट |
| १० | १० | परं तु | परन्तु |
| ११ | २ | इत्येतत् सर्व | इत्येतत्सर्वं |
| १६ | १५ | ष्पुवास | ष्युवास |
| १७ | ७ | एश्वय | ऐश्वर्य्यं |
| २३ | २ | विद्यत | विद्यते |
| २८ | ८ | अनकै | अनेकै |
| ३३ | ९ | चेद | चेद् |
| ३३ | १२ | मतद | मेतद् |
| ३५ | १० | तमेवं | तमेव |
| ३८ | १३ | यादग् | यादृग् |
| ४५ | ८ | त | ते |
| ४८ | २२ | मह्यमक | मह्यमेक |
| ४९ | १ | संगन | संगेन |
| ५० | १९ | याचातो | याचातो |
| ५१ | ५ | श्रीयषू | श्रीयेषू |
| ५२ | ११ | रोचत | रोचते |

| पत्रे | पंक्तौ | अशुद्धं | शुद्धं |
|---|---|---|---|
| ५२ | १८ | प्रीसदति | प्रसीदति |
| ५३ | ८ | ह्वारयन | ह्वारयन् |
| ५३ | २० | च्छ्रष्ठो | च्छ्रेष्ठो |
| ५५ | २० | स्वकर्मा॥ | स्वकर्मा॥ |
| ५६ | १७ | म | मे |
| ६५ | ५ | शेषे | शेषे |
| ६५ | १६ | चिचष्टे | चिचेष्टे |
| ६६ | १४ | ह्वरज्जीवं | ह्वरेज्जीवं |
| ६६ | १७ | मह्वात्म्य | माह्वात्म्य |
| ६७ | ५ | स्वसन्निधं | स्वसन्निधिं |
| ६७ | ९ | पभो | प्रभो |
| ६९ | १ | पार्श्वं | पार्श्वं |
| ६९ | ५ | संन्ध्यायां | सन्ध्यायां |
| ७२ | ३ | वक्ते | वक्त्रे |
| ७४ | २२ | अस्मदीयस्त्व | अस्मदीयैस्त्व |
| ७६ | १४ | स्तर्ह्वीदानी | स्तर्ह्वीदानी |
| ७८ | ७ | येषूं | येषूम् |
| ७८ | ८ | जग्गु | जग्मु |
| ८४ | ४ | नृजातः | नृजातेः |

491.2 The glory of Jesus
G56 Christ

TRINITY COLLEGE LIBRARY
3 1840 00458 0595

491.2
G56

| | | | |
|---|---|---|---|
| NOV 1 '64 | | | |
| | | | |
| | | | |
| | | | |
| | | | |
| | | | |
| | | | |
| | | | |
| | | | |
| | | | |
| | | | |
| | | | |
| | | | |
| | | | |
| | | | |
| | | | |
| | | | |

FILING EQUIPMENT BUREAU Cat. No. 1090A